published on August 13, said: "Our exports have continued at record levels, with recent growth especially marked to European Community countries (an increase of 9 per cent., seasonally adjusted, in the latest three months over the previous three months) and to Japan (an increase of 13 per cent.). Over the previous year the increase has been: to the EEC 35 per cent., and to Japan 63 per cent.

Longer-term picture

"Looking to the longer term, the value of exports so far this year is 19 per cent. higher than in the second half of last year; and the volume increase in the first six months of 1973 was 13 per cent. up over the second half of 1972. In contrast, the increase in the volume of imports was much less — 8 per cent. — and this

....is largely

Issued by British Information Services

British High Commission,
Chanakyapuri,
New Delhi 21.
Tel: 70371

British Deputy High Commission,
Mercantile Bank Building,
Mahatma Gandhi Road,
Bombay 1: Tel: 259981

British Deputy High Commission,
1 Ho Chi Minh Sarani,
Calcutta 16.
Tel: 445171

British Deputy High Commission,
Central Library Buildings,
15^A Mount Road;
Madras ... Tel: 83136

(नक्षत्राणि)

सू
चं
मं
बु
बृ
शु
श
रा
के

मे
वृ
मि
क
सिं
क
तु
वृ
ध
म
कुं
मी

अश्विनी
भरणी
कृत्तिका
रोहिणी
मृगशिरः
आर्द्रा
पुनर्वसु
तिष्य
अश्लेषः
मघा
पूर्वाफाल्गुनी
उत्तराफाल्गुनी
हस्तः
चित्रा
स्वाति
विशाखा
अनुराधा
ज्येष्ठः
मूलः
पूर्वाषाढा
उत्तराषाढा
श्रवणः
धनिष्ठः
शतभिषक्
पूर्वाभाद्रपदा
उत्तराभाद्रपदा
रेवती





This copy book b

This copy book belongs to

~~P. Kashi Nath Akura~~

S. Pt. ~~Thakur Bain~~

Vijayshwar Jyotish Karyalaya.

Brijlehar Rashmi

Achaarya Bhushan.
M.A Sahityalankar

Achaarya Bhushan

अमरकोश

२५८

श्रीः।

अथामरकोशः।

श्रीमदमरसिंहविरचितः।

मुरादाबादवास्तव्यश्रीयुतगौडवंशावतंसभोला-
नाथात्मजपण्डितरामस्वरूपकृतभाषाटीकया
शब्दानुक्रमणिकया च समेतः।

खेमराज श्रीकृष्णदास,

" श्रीवेङ्कटेश्वर " स्टीम्-प्रेस,

बंबई.

संवत् १९९२, शके १८५७.

मुद्रक और प्रकाशक—
खेमराज श्रीकृष्णदास,
मालिक—"श्रीवेङ्कटेश्वर" स्टीम्—प्रेस, बम्बई.

AMARKOSHA

OF

Amarsingh

AMARSINGH

WITH AN INDEX AND A COMMENTARY

BY

Ramaswarupa Bholanath Pandit

Printed and Published

BY

KHEMRAJ SHRIKRISHNADASS,

AT HIS

SHRI VENKATESHWAR STEAM PRESS,

BOMBAY.

1935

श्रीः ।

अकारादिक्रमेण अमरकोश–शब्दानुक्रमणिका ।

२

३

६

१ (प्राघूर्णिकः प्राघुणकश्चाभ्युत्थानं तु गौरवम्)

इत्यमरकोशशब्दानुक्रमणिका समाप्ता ।

श्रीः ।

अथामरकोशः

भाषाटीकासमेतः ।

प्रथमं काण्डम् १.

अथ स्वर्गवर्गः १.

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः । सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

यस्य भासा जगद्भाति सदैव सचराचरम् । तं नौमि परमात्मानं भक्तानामभयङ्करम् ॥ १ ॥ जटाटवीगलद्गंगं चन्द्रचूडामणिं शिवम् । स्मृत्वामरकृतेः कुर्वे भाषां व्याख्यासुधानुगाम् ॥ २ ॥

अन्वयः–हे अनघाः! भवद्भिः, सः, अक्षयः, धीरोः, श्रिये, च, अमृताय, च, सेव्यताम् । ज्ञानदयासिन्धोः, अगाधस्य, अस्य, ई, अस्ति, गुणाः, च, सन्ति॥ १॥

अर्थः–हे सज्जनो ! तुम उस अविनाशी ज्ञानदाता गुरुकी भोग और मोक्षकी प्राप्ति होनेके अर्थ सेवा करो, जो शास्त्रकरके संपन्न और दयाकरके पूर्ण तथा विषयोंसे विरक्त हैं, ऐसे इन गुरुके पास अखण्ड लक्ष्मी और सत्य, शौच, दया, क्षमा आदिक गुण हैं ॥ १ ॥

ग्रंथमें वक्तव्य विषय दिखलाते हैंः–

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः । सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

अन्वयः–मया, अन्यतन्त्राणि, समाहृत्य, संक्षिप्तैः, प्रतिसंस्कृतैः, वर्गैः, युक्तम्, नामलिंगानुशासनं, सम्पूर्णम्, उच्यते ॥ २॥

अर्थः–मैं व्याडि आदिकोंके नामलिङ्गानुशासन अथवा सिद्धांतोंका संग्रह करके शब्दोंके क्रमानुसार कथन करनेसे सुशोभित ऐसे थोड़े २ शब्दोंके वर्गोंसे अर्थात् पृथक् २ प्रकरणोंसे युक्त ऐसा शब्द और उनके लिंगोंका स्पष्ट रीतिसे बोध करनेवाला कोश परिपूर्ण रीतिसे कहता हूँ ॥ २ ॥

---

१ धियं राति ददाति । 'रा दाने' अस्मात् क्विप् । धीरा ज्ञानप्रदो गुरुरित्यर्थः ।

अर्थात्–ज्ञानके देनेवाले गुरुको धीर कहते हैं ।

इस ग्रंथमें लिंगादिव्यवस्था किस प्रकारसे की है वह कहते हैं:—

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् । स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

अन्वयः—अत्र, प्रायशः, रूपभेदेन, स्त्रीपुंनपुंसकं, ज्ञेयम्; च कुत्रचित्, साहचर्यात्, स्त्रीपुंनपुंसकं ज्ञेयम्; क्वचित्, तद्विशेषविधेः, स्त्रीपुंनपुंसकं ज्ञेयम् ॥३॥

अर्थः--इस ग्रंथमें बहुत करके ईप्, आप्, विसर्ग और अनुस्वार इनसे स्त्रीलिंग, पुँल्लिंग और नपुँसकलिंग जानना, जैसे—'पद्मालया' और 'पद्मा' यहां 'आप्' होनेसे 'पद्मालया' और 'पद्मा' यह स्त्रीलिङ्ग हैं। 'पिनाकोऽजगवं धनुः' 'पिनाकः' यहांपर विसर्ग है इससे 'पिनाक' शब्द पुँल्लिङ्ग है । 'अजगवम्' यहांपर अनुस्वार होनेसे 'अजगव' शब्द नपुंसक है. कहींपर विशेषणमें स्थित अथवा सर्वनामवाचक शब्दमें स्थित रूपके भेदसे लिंगोंमें भेद होता है, जैसा—'तत्परो हनुः' यहांपर 'तत्परः' इस विशेषणका पुँल्लिंगरूप होनेसे उसका विशेष्य जो 'हनु' शब्द है उसका भी पुँल्लिंगहीमें रूप चलता है तथा 'कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्' यहां 'सा' यह जो सर्वनामसंज्ञक शब्द है वह '[illegible] शब्दका विशेषण है इससे 'सा' इ[illegible] स्त्रीलिंग होनेसे उसका विशेष्य [illegible] 'कुतू' शब्द है उसका भी स्त्रीलिंग[illegible] और निश्चित है लिंग जिसका ऐसा [illegible] समीप उच्चारण करनेसे उसका जो [illegible] है वही लिंग उस समीप पढ़े हुए अ[illegible]श्चितलिंगवाले शब्दका जानना, [illegible] 'अश्वयुगश्विनी' 'भानुः करः' 'वि[illegible]ष्णुपदम्' यहांपर 'अश्वयुज्' 'भानु' [illegible] 'वियद्' इन अनिश्चितलिंगवाले शब्[illegible] समीप निश्चित लिंगवाले 'अश्वि[illegible] 'कर' और 'विष्णुपद' ये शब्द है[illegible] उनके जो लिंग हैं वे ही लिंग उन अ[illegible]श्चित लिंगवाले शब्दोंके जानने अ[illegible] 'अश्वयुज्' शब्दका स्त्रीलिंग, 'भा[illegible] शब्दका पुँल्लिंग और 'वियद्' शब्[illegible] नपुंसक लिंग है, इस प्रकारसे जान[illegible] और कहीं कहींपर उन स्त्री, [illegible] नपुंसक इनके विशेषरीतिसे कथन [illegible]नेसे स्त्रीलिंग, पुँल्लिंग और नपुंसक[illegible] जानना. जैसे 'भेरी स्त्री दुन्दुभिः पुम[illegible] 'रोचिः शोचिरुभे क्लीबे' यहां [illegible] भेरी शब्दके समीप 'स्त्री' [illegible] विशेषरीतिसे कथन किया है इस[illegible] 'भेरी' यह शब्द स्त्रीलिंग है [illegible] 'दुन्दुभि' शब्दके समीप 'पुमान्' [illegible]

थन करनेसे 'दुन्दुभि' शब्द पुँलिंग है और 'रोचिस्' 'शोचिस्' शब्दोंके समीप भे क्लीबे' अर्थात् दोनों भी नपुंसक ह विशेष कथन करनेसे 'रोचिस्' और ोचिस्' ये शब्द नपुंसकलिङ्ग हैं, इस कारसे सर्वत्र जानना ॥ ३ ॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो संकरः । कृतोऽत्र भिन्नलिंगाना-नुक्तानां क्रमादृते ॥ ४ ॥

अन्वयः—अत्र, अनुक्तानां, भिन्न-लिङ्गानां, भेदाख्यानाय, द्वन्द्वः,न, कृतः, कशेषः, न, कृतः, क्रमात्, ऋते, करः, न, कृतः ॥ ४ ॥

अर्थः—इस कोशमें अपने अपने र्यायेंमें नहीं पढ़े हुए भिन्न २ लिङ्ग-ले शब्दोंका लिङ्गभेद कहनेके अर्थ न्द्व और एकशेष नहीं किया है,जैसे-'दे-ता'शब्द स्त्रीलिङ्ग है'दैवत' शब्द नपुं-कलिङ्ग है और 'अमर' शब्द पुँलिङ्ग , इन भिन्नभिन्न लिङ्गवाले 'देवता''दै-त' और 'अमर' शब्दोंका लिङ्गभेद हनेके अर्थ 'देवतादैवतामराः' ऐसा न्द्वसमास नहीं कियां है. द्वन्द्वसमास िया जाय तो 'अमर' शब्दका पुँलिङ्ग 'देवता' और'दैवत' इनका हो जाय-. कारण द्वन्द्व समासमें और तत्पुरुष-में परपदका ही लिङ्ग होता है. वह यहां पर परपदालिङ्ग जो 'अमर' शब्दका पुँ-लिङ्ग है सो 'देवता' और 'दैवत' शब्द-का नहीं होनेके वास्ते द्वन्द्व समास नहीं किया ऐसा सर्वत्र जानना. ऐसे ही 'नभः खं श्रावणो नभाः' यहांपर'अश्राव-णौ तु नभसी' ऐसा 'नभसी' इसप्रका-रका एकशेष भी नहीं किया, यदि'नभा-श्च नभश्च नभसी'ऐसा एकशेष करनेसे 'नभसी' यह नपुंसकलिङ्ग शेष रहेगा फिर आकाशवाचक 'नभस्' शब्द नपुं-सकलिङ्ग होगा परन्तु श्रावणवाचक 'नभस्' शब्द पुँल्लिङ्ग है ऐसा नहीं जाना जायगा, इस वास्ते 'खं नभः' और ' श्रावणो नभाः' ऐसा पृथक् २ 'नभस्' शब्द कहा है, लिङ्गभेद समझनेके लिये एकशेष'नभसी' ऐसा नहीं किया, परन्तु समान लिङ्गोंका तो द्वन्द्वसमास किया ही है. जैसे—'स्वर्गनाकत्रिदिवत्रिदशालयाः' 'पादा रश्म्यंघ्रितुर्यांशाः' यहां पर एक-लिङ्गके ही सब शब्द हैं, इसवास्ते उनका द्वन्द्वसमास किया है और जिन शब्दोंके पर्यायशब्द और लिङ्ग स्वतंत्रतासे अन्य स्थलोंमें कहे हैं, उससे अन्यत्र जो उस भिन्नलिङ्ग शब्दोंका किसी अर्थान्तरके अर्थ कथन करनेके लिये द्वन्द्वसमास

किया है, जैसे–'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः' 'मातापितरौ पितरौ' यहांपर 'अप्सरस्' शब्द अपने पर्यायोंमें 'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' यहां ही स्त्रीलिङ्ग है ऐसा कहा है. उसी 'अप्सरस्' शब्दको देवयोनिमें परिगणनरूप अर्थके लिये विद्याधर आदिक गणोंमें पठित किया है और 'विद्याधर' 'अप्सरस्' 'यक्ष' 'रक्षस्' 'गन्धर्व' 'किन्नर' इन सब शब्दोंका द्वन्द्व, समास किया है, अब यहांपर यद्यपि सर्वशब्दोंका द्वन्द्वसमास होनेसे 'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः' ऐसा पुँल्लिङ्ग रूप बना है तो भी 'अप्सरस्' शब्दका अन्यत्र 'स्त्रियां बहुष्वप्सरसः' यहांपर कथन करनेके अनुसार स्त्रीलिङ्ग ही है ऐसा समझना और 'मातापितरौ पितरौ' यहांपर 'पितरौ' इसमें 'मातृ' और 'पितृ' ऐसे दोनों शब्दोंका एकवद्भाव किया गया है, इसमें 'मातृ' और 'पितृ' इनमेंसे 'पितृ' इसका शेष रहा है, इससे 'पितृ' इस शब्दको 'मातृ' 'पितृ' इन दोनोंका वाचकत्व होनेसे भी उसके अन्तर्गत यद्यपि 'मातृ' यह शब्द है तथापि वह 'मातृ' शब्द 'जनयित्री प्रसूर्माता' इस स्थलमें पर्यायशब्दोंके साथ स्त्रीलिङ्ग पठित है इसवास्ते उस 'पितरौ' इसके अन्तर्गत 'मातृ' शब्दका स्त्रीलिङ्ग ही है ऐसा जानना। और इस कोशमें उन भिन्न भिन्न लिङ्गवाले शब्दोंका क्रम छोड़के भिन्न २ लिङ्गवाले शब्दोंमें संकर कहिये मिश्रण नहीं किया है. जैसे–'स्तवः स्तोत्रं स्तुतिर्नुतिः' यहांपर 'स्तव' ऐसा पुँल्लिङ्ग कहा, फिर 'स्तोत्रं' यह नपुंसकलिंग कहा, फिर 'स्तुतिः' 'नुतिः' वे स्त्रीलिङ्ग शब्द कहे हैं. 'स्तुतिः स्तोत्रः स्तवो नुतिः' ऐसा लिंगोंका मिश्रणरूप संकर नहीं किया है. ऐसा ही 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः' यहांपर 'जनुर्जननजन्मानि' ये नपुंसक शब्द कहे, फिर 'जनिः' 'उत्पत्ति' ये स्त्रीलिङ्ग शब्द कहे, फिर 'उद्भवः' यह पुँल्लिङ्ग शब्द कहा। इस प्रकारसे सर्वत्र लिङ्गविषयमें जानना॥४॥

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति। निषिद्धलिंगं शेषार्थं त्वन्ताथादि न पूर्वभाक्॥ ५॥

अन्वयः–त्रिलिङ्ग्याम्, त्रिषु, इति, पदम्, ज्ञेयम्, मिथुने, तु, द्वयोः, इति पदम्, ज्ञेयम्, निषिद्धलिङ्गम्, शेषार्थम्,

ज्ञेयम्, त्वन्ताथादि, पूर्वभाक्, न, इति ज्ञेयम् ॥ ५ ॥

अर्थः—इस ग्रंथमें जहांपर कोई शब्द तीनों लिंगोंमें चलता हो वह 'त्रिषु' ऐसा पद कथन किया है सो जानना, जैसे-- 'त्रिषु स्फुलिंगोऽग्निकणः' यहांपर 'स्फुलिङ्ग' शब्द तीनों लिंगोंमें होता है इसवास्ते उस 'स्फुलिङ्ग' शब्दके समीप 'त्रिषु' यह पद कथन किया है। और जहांपर स्त्रीलिंग और पुँलिङ्ग इन दोनों लिंगोंमें कोई शब्द होता हो तो वहां 'द्वयोः' ऐसा पद कथन किया है सो जानना, जैसे—'द्वयोर्ज्वालकीलौ' यहांपर 'ज्वाल' और 'कील' ये दोनों शब्द पुँलिङ्ग और स्त्रीलिंग हैं इसवास्ते 'द्वयोः' ऐसा कथन किया है। 'द्वयोः' यह केवल द्विशब्दका उपलक्षण है, अर्थात् किसी भी तरहसे द्वि--शब्दका जहांपर प्रयोग होगा वहां स्त्रीलिंग और पुँलिंग जानना. जैसे-'द्विहीनं प्रसवे सर्वम्' और 'द्वयहीने कुकुन्दरे' इत्यादिक स्थलमें द्वि शब्दसे स्त्रीलिंग और पुँलिंग ऐसा अर्थ करनेसे प्रसव--वाचक जितने शब्द हैं वे सर्व स्त्रीलिंग और पुँलिंगसे रहित हैं अर्थात् नपुंसकलिंग हैं और कुकुन्दर-शब्द द्वय-कहिये स्त्रीलिंग और पुँलिंग इनसे रहित है अर्थात् नपुंसकलिंग है ऐसा जानना. तथा जिस शब्दका जो लिंग निषिद्ध किया हो उसके अतिरिक्त बाकी रहा लिंग उस शब्दका जानना. जैसे 'वज्रमस्त्री' यहांपर 'वज्र' यह शब्द 'अस्त्री' कहिये स्त्रीलिंग नहीं है, इससे 'वज्र' शब्दको स्त्रीलिंगत्वका निषेध होनेपर बाकी रहे पुँलिंग और नपुंसकलिंग इस 'वज्र' शब्दके हैं ऐसा जानना और जहां जिस शब्दके पीछे 'तु' यह शब्द हो वहां उस तु-शब्दके प्रथम जो शब्द हो उसका पर्यायवाचक शब्द केवल उस तु-शब्दके पीछे पढ़ा हुआ ही शब्द होता है, उससे पहला शब्द उस 'तु' के पहले पठित किये शब्दका पर्यायवाचक शब्द नहीं होता है. जैसे-- 'नगरी' त्वमरावती' यहांपर 'तु' यह जो शब्द पठन किया है इसके पूर्व पठित जो 'नगरी' शब्द है उसका पर्यायअर्थबोधक शब्द 'अमरावती' यह है इस तु--शब्दके कथन करनेसे 'नगरी' इसका संबंध 'अमरावती' इसमें होता है उस 'नगरी' शब्दके प्रथम पठित 'इन्द्राणी' शब्दमें नहीं होता है यह 'तु' अन्त में जिसके है ऐसे नामपदकी व्यवस्था कही अत्र इसी प्रकारसे 'तु' जिसके अन्तमें

है ऐसा लिंगवाचक पद सर्वनामसंज्ञक पद और अव्ययसंज्ञक पद इन पदोंका भी संबंध उस तु-शब्दके पीछे पढ़े हुए शब्दमें ही होता है,जैसे—'पुंसि त्वन्तार्धिः' यहां 'पुंसि' इस लिंगवाचक पदका 'अन्तार्धिः' इस पदमें संबंध हुआ और 'तस्य तु प्रिया' यहां 'तस्य'इस सर्वनामसंज्ञक पदका तु--शब्दके पीछे पठित प्रिया-शब्दमें संबंध हुआ और 'वा तु पुंसि' यहांपर 'वा' इस अव्ययसंज्ञक पदका तु-शब्दके पीछे पठित 'पुंसि' इसमें संबंध हुआ. इस प्रकारसे सर्वत्र तु-शब्दके विषयमें जानना । और इस कोशमें जहांपर जिन शब्दोंके प्रथम 'अथ' यह शब्द हो वहां उस अथ--शब्दके पीछे पठित नामपद, लिंगपद, सर्वनामपद और अव्ययपद इनका संबंध उस अथ-के प्रथम पठित शब्दोंमें नहीं होता है । उन अथ-शब्दके पीछे पठित शब्दोंका सम्बन्ध अथ--शब्दके पीछे पठित शब्दोंमें ही होता है जैसे—'जवोऽथ शीघ्रं त्वरितम्' यहांपर अथ-शब्दके पीछे पठित 'शीघ्र' इस नामपदका सम्बन्ध उस अथ—के प्रथम पठित जब-शब्दमें नहीं होता है किंतु अथ-शब्दके पीछे पठित 'शीघ्र' इस नामपदका संबंध उस अथ—शब्दके पीछे पठित 'त्वरितम्' 'लघु' 'क्षिप्रम्' 'अरम्' 'द्रुतम्' इन शब्दोंमें होता है। ऐसे ही 'शस्तं चाथ त्रिषु द्रव्ये' यहांपर अथ-शब्दके पीछे पठित 'त्रिषु' इस लिंगवाचक पदका द्रव्यवाचक पाप, पुण्य, सुख आदिक पदोंमें संबंध होता है. उस अथ—के प्रथम पठित 'शस्तं' इसमें संबंध नहीं होता है. अब जहां अथ--शब्दके बदलेमें कहीं कहीं अथो-शब्द कहा हो वहां भी इसी प्रकारकी व्यवस्था जाननी. जैसे—' अनुक्रोशोऽप्यथो हसः' यहांपर अथो इस शब्दके पीछे पठित 'हस' इस नामपदका संबंध उनके पीछे पठित 'हास' 'हास्य' इन शब्दोंमें होता है. उस अथो-शब्दके प्रथम पठित अनुक्रोश--शब्दमें नहीं होता है । इस प्रकारसे व्यवस्था इस कोशमें की है, सो जिज्ञासु जनोंको जाननी चाहिये ॥५॥

इति परिभाषा ॥

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः॥सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ ६ ॥

स्वर्गके नाम ९–स्वर् १ स्वर्ग २ नाक ३ त्रिदिव ४ त्रिदशालय ५ सुरलोक ६ द्यो ७ दिव् ८ त्रिविष्टप ९ ॥ ६ ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः । सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥ आदितेया दिविषदो लेखा अदितिनन्दनाः । आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥ बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः । वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

देवताओंके नाम २६–अमर १ निर्जर २ देव ३ त्रिदश ४ विबुध ५ सुर ६ सुपर्वन् ७ सुमनस् ८ त्रिदिवेश ९ दिवौकस् १० ॥ ७ ॥ आदितेय ११ दिविषद् १२ लेख १३ अदितिनन्दन १४ आदित्य १५ ऋभु १६ अस्वप्न १७ अमर्त्य १८ अमृतान्धस् १९ ॥ ८ ॥ बर्हिर्मुख २० क्रतुभुज २१ गीर्वाण २२ दानवारि २३ वृंदारक २४ दैवत २५ देवता २६ ॥ ९ ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः । महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

गणदेवताओंके नाम ९–आदित्य (बारह) १ विश्व (तेरह) २ वसु (आठ) ३ तुषित (छत्तिस) ४ आभास्वर (चौंसठ) ५ अनिल (उनञ्चास) ६ महाराजिक (दोसौ बीस) ७ साध्य (बारह) ८ रुद्र (ग्यारह) ९ ॥ १० ॥

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ११ ॥

देवताओंकी जातिके भेद १०–विद्याधर १ अप्सरस् २ यक्ष ३ रक्षस् ४ गंधर्व ५ किन्नर ६ पिशाच ७ गुह्यक ८ सिद्ध ९ भूत १० ॥ ११ ॥

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः । शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

दैत्योंके नाम १०–असुर १ दैत्य २ दैतेय ३ दनुज ४ इन्द्रारि ५ दानव ६ शुक्रशिष्य ७ दितिसुत ८ पूर्वदेव ९ सुरद्विष् १० ॥ १२ ॥

सर्वज्ञः सुगतो बुद्धो, धर्म्मराजस्तथागतः । समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥ १३ ॥ षडभिज्ञो दशबलोऽद्वयवादी विनायकः । मुनीन्द्रः श्रीघनः शास्ता, मुनिः-

बुद्धिके नाम १८--सर्वज्ञ १ सुगत २ बुद्धि ३ धर्मराज ४ तथागत ५ समन्तभद्र ६ भगवत् ७ माराजित् ८ लोकजित् ९ जिन १० ॥ १३ ॥ षडभिज्ञ ११ दशबल १२ अद्वयवादिन् १३ विनायक १४ मुनीन्द्र १५ श्रीघन १६ शास्तृ १७ मुनि १८ ॥-

-शाक्यमुनिस्तु यः ॥ १४ ॥ स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः । गौतमश्चार्कबन्धुश्च, मायादेवीसुतश्च सः ॥ १५ ॥

शाक्यसिंहके नाम ७-शाक्यमुनि १ ॥ १४ ॥ शाक्यसिंह २ सर्वार्थसिद्ध ३ शौद्धोदनि ४ गौतम ५ अर्कबन्धु ६ मायादेवीसुत ७ ॥ १५ ॥

ब्रह्मात्मभूः सुरज्येष्ठः, परमेष्ठी पितामहः । हिरण्यगर्भो लोकेशः, स्वयंभूश्चतुराननः ॥ १६ ॥ धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः । स्रष्टा प्रजापतिर्वेधा, विधाता विश्वसृड्विधिः ॥ १७ ॥

ब्रह्माजीके नाम २०-ब्रह्मन् १ आत्मभू २ सुरज्येष्ठ ३ परमेष्ठिन् ४ पितामह ५ हिरण्यगर्भ ६ लोकेश ७ स्वयम्भू ८ चतुरानन ९ ॥ १६ ॥ धातृ १० अब्जयोनि ११ द्रुहिण १२ विरिञ्चि १३ कमलासन १४ स्रष्टृ १५ प्रजापति १६ वेधस् १७ विधातृ १८ विश्वसृज् १९ विधि २० ॥ १७ ॥

विष्णुर्नारायणः कृष्णो, वैकुण्ठो विष्टरश्रवाः । दामोदरो हृषीकेशः, केशवो माधवः स्वभूः ॥ १८ ॥ दैत्यारिः पुण्डरीकाक्षो, गोविन्दो गरुडध्वजः । पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥ उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः । पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥ देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः। वनमाली बलिध्वंसी, कंसारातिरधोक्षजः ॥ ॥ २१ ॥ विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।--

विष्णुभगवान्के नाम ३९-विष्णु १ नारायण २ कृष्ण ३ वैकुण्ठ ४ विष्टरश्रवस् ५ दामोदर ६ हृषीकेश ७ केशव ८ माधव ९ स्वभू १० ॥ १८ ॥ दैत्यारि ११ पुण्डरीकाक्ष १२

गोविन्द १३ गरुडध्वज १४ पीतांबर १५ अच्युत १६ शार्ङ्गिन् १७ विष्वक्सेन १८ जनार्दन १९ ॥ १९ ॥ उपेन्द्र २० इन्द्रावरज २१ चक्रपाणि २२ चतुर्भुज २३ पद्मनाभ २४ मधुरिपु २५ वासुदेव २६ त्रिविक्रम २७ ॥ २० ॥ देवकीनन्दन २८ शौरिन् २९ श्रीपति ३० पुरुषोत्तम ३१ वनमालिन् ३२ बलिध्वंसिन् ३३ कंसाराति ३४ अधोक्षज ३५ ॥ २१ ॥ विश्वंभर ३६ कैटभाजित् ३७ विधु ३८ श्रीवत्सलाञ्छन ३९ ॥–

वसुदेवोऽस्य जनकः, स एवानकदुन्दुभिः ॥ २२ ॥

वसुदेवजीके नाम २–वसुदेव १ आनकदुन्दुभि २ ॥ २२ ॥

बलभद्रः प्रलम्बघ्नो, बलदेवोऽच्युताग्रजः । रेवतीरमणो रामः, कामपालो हलायुधः ॥ २३ ॥ नीलांबरो रौहिणेयस्तालांको मुसली हली । संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥

बलदेवजीके नाम १७–बलभद्र १ प्रलम्बघ्न २ बलदेव ३ अच्युताग्रज ४ रेवतीरमण ५ राम ६ कामपाल ७ हलायुध ८ ॥ २३ ॥ नीलांबर ९ रौहिणेय १० तालांक ११ मुसलिन् १२ हलिन् १३ संकर्षण १४ सीरपाणि १५ कालिन्दीभेदन १६ बल १७ ॥ २४ ॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः । कन्दर्पो दर्पकोऽनंगः, कामः पञ्चशरः स्मरः ॥ २५ ॥ शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः । पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥ ब्रह्मसूर्ऋष्यकेतुः–

कामदेवके नाम २१–मदन १ मन्मथ २ मार ३ प्रद्युम्न ४ मीनकेतन ५ कन्दर्प ६ दर्पक ७ अनंग ८ काम ९ पञ्चशर १० स्मर ११ ॥ २५ ॥ शम्बरारि १२ मनसिज १३ कुसुमेषु १४ अनन्यज १५ पुष्पधन्वन् १६ रतिपति १७ मकरध्वज १८ आत्मभू १९ ॥ २६ ॥ ब्रह्मसू २० ऋष्यकेतु २१ ॥–

–स्यादनिरुद्ध उषापतिः ।–

अनिरुद्धके नाम २–अनिरुद्ध १ उषापति २ ॥–

लक्ष्मीः पद्मालया पद्मा, कमला श्रीर्हरिप्रिया ॥ २७ ॥

लक्ष्मीजीके नाम ६–लक्ष्मी १ पद्मालया २ पद्मा ३ कमला ४ श्री ५ हरिप्रिया ६ ॥ २७ ॥

शंखो लक्ष्मीपतेः पाञ्चजन्य-

विष्णुभगवान्‌के शंखका नाम १--पाञ्चजन्य १ ॥-

-श्चक्रं सुदर्शनम् ।

विष्णुभगवान्‌के चक्रका नाम १--सुदर्शन १ ॥

कौमोदकी गदा-

विष्णुभगवान्‌की गदाका नाम १--कौमोदकी १ ॥-

-खड्गो नन्दकः-

विष्णुके खड्गका नाम १--नन्दक १ ॥--

-कौस्तुभो मणिः ॥ २८ ॥

विष्णुकी मणिका नाम १--कौस्तुभ १ ॥ २८ ॥

गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः । नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥

गरुडजीके नाम ९--गरुत्मत् १ गरुड २ तार्क्ष्य ३ वैनतेय ४ खगेश्वर ५ नागान्तक ६ विष्णुरथ ७ सुपर्ण ८ पन्नगाशन ९ ॥ २९ ॥

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः । ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः॥३०॥ भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः । मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३१ ॥ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् । वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥ कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः । हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३॥ गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।। व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३४ ॥

शिवजीके नाम ४८--शम्भु १ ईश २ पशुपति ३ शिव ४ शूलिन् ५ महेश्वर ६ ईश्वर ७ शर्व ८ ईशान ९ शंकर १० चन्द्रशेखर ११ ॥ ३० ॥ भूतेश १२ खण्डपरशु १३ गिरीश १४ गिरिश १५ मृड १६ मृत्युञ्जय १७ कृत्तिवासस् १८ पिनाकिन् १९ प्रमथाधिप २० ॥ ३१ ॥ उग्र २१ कपर्दिन् २२ श्रीकण्ठ २३ शितिकण्ठ २४ कपालभृत् २५ वामदेव २६ महादेव २७ विरूपाक्ष २८ त्रिलोचन २९ ॥ ३२ ॥ कृशानुरेतस् ३० सर्वज्ञ ३१ धूर्जटि ३२ नीललोहित ३३ हर ३४ स्मरहर ३५ भर्ग ३६ त्र्यम्बक ३७ त्रिपुरान्तक ३८ ॥ ३३॥ गंगाधर ३९

न्धकरिपु ४० क्रतुध्वंसिन् ४१ वृष-
ज ४२ व्योमकेश ४३ भव ४४
म ४५ स्थाणु ४६ रुद्र ४७ उमा-
ति ४८ ॥ ३४ ॥

कपर्दोऽस्य जटाजूटः

शिवजीके जटाजूटका नाम १-
पर्द १॥-

-पिनाकोऽजगवं धनुः ।

शिवजीके धनुषके नाम २-पिनाक
अजगव २ ॥

प्रमथाः स्युः पारिषदा-

शिवजीके पार्षदोंके नाम २-प्रमथ
पारिषद २ ॥-

-ब्राह्मीत्याद्यास्तु मातरः ॥३५॥

**ब्राह्मी माहेश्वरी चैव कौमारी
ष्णवी तथा । वाराही च तथेन्द्रा-
णी चामुण्डा सप्त मातरः ॥"**

ब्राह्मी आदि शक्तियोंके नाम ७-
ह्मी १ माहेश्वरी २ कौमारी ३ वैष्णवी
वाराही ५ इन्द्राणी ६ चामुण्डा
॥ ३५ ॥

विभूतिर्भूतिरैश्वर्य-

श्वर्यके नाम ३-विभूति १ भूति
ऐश्वर्य ३ ॥-

-मणिमादिकमष्टधा ।

**"अणिमा महिमा चैव गरिमा
लघिमा तथा । प्राप्तिः प्राकाम्यमी-
शित्वं वशित्वं चाष्टसिद्धयः ॥"**

ऐश्वर्यके भेद ८-अणिमन् १ महि-
मन् २ गरिमन् ३ लघिमन् ४ प्राप्ति
५ प्राकाम्य ६ ईशित्व ७ वशित्व ८ ॥

**उमा कात्यायनी गौरी काली है-
मवतीश्वरी ॥३६॥ शिवा भवानी
रुद्राणी शर्वाणी सर्वमङ्गला । अप-
र्णा पार्वती दुर्गा मृडानी चण्डिका-
म्बिका ॥ ३७ ॥**

**" आर्या दाक्षायणी चैव गिरिजा
मेनकात्मजा ॥"**

पार्वतीके नाम २१-उमा १
कात्यायनी २ गौरी ३ काली ४ हैम-
वती ५ ईश्वरी ६ ॥ ३६ ॥ शिवा ७
भवानी ८ रुद्राणी ९ शर्वाणी १०
सर्वमंगला ११ अपर्णा १२ पार्वती १३
दुर्गा १४ मृडानी १५ चण्डिका १६
अम्बिका १७ ॥ ३७ ॥ आर्या १८
दाक्षायणी १९ गिरिजा २० मेनका-
त्मजा २१ ॥

**विनायको विघ्नराजद्वैमातुरगणा-
धिपाः । अप्येकदन्तहेरम्बलम्बोदर-
गजाननाः ॥ ३८ ॥**

गणेशके नाम ८-विनायक १ विघ्न-
राज २ द्वैमातुर ३ गणाधिप ४ एकदन्त
५ हेरम्ब ६ लम्बोदर ७ गजानन ८ ॥ ३८ ॥

कार्त्तिकेयो महासेनः शरजन्मा षडाननः । पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥ बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः । षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥

स्वामिकार्त्तिकेयके नाम १७— कार्त्तिकेय १ महासेन २ शरजन्मन् ३ षडानन ४ पार्वतीनन्दन ५ स्कन्द ६ सेनानी ७ अग्निभू ८ गुह ९ ॥३९॥ बाहुलेय १० तारकजित् ११ विशाख १२ शिखिवाहन १३ षाण्मातुर १४ शक्तिधर १५ कुमार १६ क्रौञ्चदारण १७ ॥ ४० ॥

इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः । वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः॥४१॥जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः । सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा॥४२॥वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः । जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः॥४३॥ संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः । आखण्डलः सहस्राक्ष ऋभुक्षा—

इन्द्रके नाम ३५—इन्द्र १ मरुत्वत् २ मघवन् ३ बिडौजस् ४ पाकशासन ५ वृद्धश्रवस् ५ शुनासीर ७ पुरुहूत ८ पुरन्दर ९ ॥४१॥ जिष्णु १० लेखर्षभ ११ शक्र १२ शतमन्यु १३ दिवस्पति १४ सुत्रामन् १५ गोत्रभिद् १६ वज्रिन् १७ वासव १८ वृत्रहन् १९ वृषन् २० ॥ ४२ ॥ वास्तोष्पति २१ सुरपति २२ बलाराति २३ शचीपति २४ जम्भभेदिन् २५ हरिहय २६ स्वाराज् २७ नमुचिसूदन २८॥४३॥ संक्रन्दन २९ दुश्च्यवन ३० तुरासाह् ३१ मेघवाहन ३२ आखण्डल ३३ सहस्राक्ष ३४ ऋभुक्षिन् ३५ ॥—

—स्तस्य तु प्रिया ॥ ४४ ॥ पुलोमजा शचीन्द्राणी—

इन्द्राणीके नाम ३— ॥४४॥ पुलोमजा १ शची २ इन्द्राणी ३—

—नगरी त्वमरावती ।

इन्द्रपुरीका नाम १—अमरावती १॥

हय उच्चैःश्रवाः—

इन्द्रके घोड़ेका नाम १—उच्चैःश्रवस् १॥—

—सूतो मातलि—

इन्द्रके सारथिका नाम १-मातलि १॥—

—र्नन्दनं वनम् ॥ ४५ ॥

इन्द्रके बगीचेका नाम १-नन्दन १ ॥ ४५ ॥

स्यात्प्रासादो वैजयंतो--

इन्द्रके धवरहरको नाम १-वैजयन्त १ ॥

--जयंतः पाकशासनिः ।

इन्द्रके पुत्रके नाम २-जयन्त १ पाकशासनि २ ॥

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४६ ॥

इन्द्रके हाथिके नाम ४-ऐरावत १ अभ्रमातंग २ ऐरावण ३ अभ्रमुवल्लभ ४ ॥ ४६ ॥

ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः । शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥ ४७ ॥

वज्रके नाम १०--ह्रादिनी १ वज्र २ कुलिश ३ भिदुर ४ पवि ५ शतकोटि ६ स्वरु ७ शम्ब ८ दम्भोलि ९ अशनि १० ॥ ४७ ॥

व्योमयानं विमानोऽस्त्री-

विमानके नाम २--व्योमयान १ विमान २॥-

-नारदाद्याः सुरर्षयः ।

सुरऋषियोंके नाम-नारद आदि ॥

स्यात्सुधर्मा देवसभा-

देवसभाके नाम् २-सुधर्मा १ देवसभा २॥-

-पीयूषममृतं सुधा ॥ ४८ ॥

अमृतके नाम ३-पीयूष १ अमृत २ सुधा ३ ॥ ४८ ॥

मंदाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।

स्वर्गगंगाके नाम ४--मन्दाकिनी १ वियद्गंगा २ स्वर्णदी ३ सुरदीर्घिका ४॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥

सुमेरुपर्वतके नाम५-मेरु१सुमेरु २ हेमाद्रि ३ रत्नसानु ४ सुरालय५॥४९॥

पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥

देववृक्षोंके नाम ५-मन्दार १ पारिजातक २ सन्तान ३ कल्पवृक्ष ४ हरिचन्दन ५ ॥ ५० ॥

सनत्कुमारो वैधात्रः-

सनत्कुमारके नाम २-सनत्कुमार १ वैधात्र २॥-

-स्ववैद्यावश्विनीसुतौ । नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥

अश्विनीकुमारके नाम ६-स्ववैद्य १ अश्विनीसुत २ नासत्य ३ अश्विन् ४ दस्र ५ आश्विनेय ६ ॥ ५१ ॥

स्त्रियां बहुष्वप्सरसः स्ववैश्या उर्वशीमुखाः ।

अप्सराओंके नाम २—अप्सरस् १ स्वर्वेश्या २॥ वे उर्वशी आदिक अप्सराएँ हैं ॥

हाहाहूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५२ ॥

गन्धर्वोंके नाम २—हाहा १ हूहू २ आदि देवोंके गवैये हैं ॥ ५२ ॥

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः । कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥ बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः । आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५४ ॥ रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥ हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ॥ ५५ ॥ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः । शुचिरप्पित्त—

अग्निके नाम ३४—अग्नि १ वैश्वानर २ वह्नि ३ वीतिहोत्र ४ धनञ्जय ५ कृपीटयोनि ६ ज्वलन ७ जातवेदस् ८ तनूनपात् ९ ॥ ५३ ॥ बर्हिस् १० शुष्मन् ११ कृष्णवर्त्मन् १२ शोचिष्केश १३ उषर्बुध १४ आश्रयाश १५ बृहद्भानु १६ कृशानु १७ पावक १८ अनल १९ ॥ ५४ ॥ रो (लो) हिताश्व २० वायुसख २१ शिखावत् २२ आशुशुक्षणि २३ हिरण्यरेतस् २४ हुतभुज् २५ दहन २६ हव्यवाहन २७ ॥ ५५ ॥ सप्तार्चिस् २८ दमुनस् २९ शुक्र ३० चित्रभानु ३१ विभावसु ३१ शुचि ३२ अप्पित्त ३४—

—और्वस्तु वाडवो वडवानलः ५६

वडवानलके नाम ३-और्व १ वाडव २ वडवानल ३ ॥ ५६ ॥

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ।

अग्निकी ज्वालाके नाम ५—ज्वाल १ कील २ अर्चिस् ३ हेति ४ शिखा ५ ॥

त्रिषु स्फुलिंगोऽग्निकणः—

चिनगारीके नाम २—स्फुलिंग १ अग्निकण २॥—

—संतापः संज्वरः समौ ॥ ५७ ॥

संतापके नाम २—सन्ताप १ सञ्ज्वर २ ॥ ५७ ॥

धर्मराजः पितृपतिः समवर्ती परेतराट् । कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ॥ ५८ ॥ कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।

यमराजके नाम १४—धर्मराज १ पितृपति २ समवर्तिन् ३ परेतराज् ४ कृतान्त ५ यमुनाभ्रात ६ शमन ७ यमराज् ८ यम ९॥५८॥काल १० दण्डधर ११ श्राद्धदेव १२ वैवस्वत १३ अन्तक १४ ॥

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ॥ ५९ ॥ रात्रिंचरो रात्रिचरः, कर्बुरो निकषात्मजः । यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

राक्षसोंके नाम १५--राक्षस १ कौणप २ क्रव्याद् ३ क्रव्याद ४ अस्रप ५ आशर ६॥५९॥रात्रिञ्चर ७ रात्रिचर ८ कर्बुर ९ निकषात्मज १० यातुधान ११ पुण्यजन १२ नैर्ऋत १३ यातु १४ रक्षस् १५ ॥ ६० ॥

प्रचेता वरुणः पाशी यादसां पतिरप्पतिः ।

वरुणके नाम ५--प्रचेतस् १ वरुण २ पाशिन् ३ यादसाम्पति ४ अप्पति ५॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥ पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः । समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥ नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥

वायुके नाम २०--श्वसन १ स्पर्शन २ वायु ३ मातरिश्वन् ४ सदागति ५ ॥६१॥ पृषदश्व ६ गन्धवह ७ गन्धवाह ८ अनिल ९ आशुग १० समीर ११ मारुत १२ मरुत् १३ जगत्प्राण १४ समीरण १५ ॥६२॥ नभस्वत् १६ वात १७ पवन १८ पवमान १९ प्रभञ्जन २० ॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ ६३ ॥ शरीरस्था इमे—

हृदयके वायुका नाम १—प्राण १॥ गुदाके वायुका नाम १--अपान १॥ नाभिके वायुका नाम १--समान १॥ कण्ठके वायुका नाम १--उदान १॥ सब शरीरमें फिरनेवाले वायुका नाम १---व्यान १ ॥ ६३ ॥--

--रंहस्तरसी तु रयः स्यदः । जवो--

वेगके नाम ५--रंहस् १ तरस् २ रय ३ स्यद ४ जव ५॥--

-ऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६४ ॥ सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

शीघ्रताके नाम ११—शीघ्र १ त्वरित २ लघु ३ क्षिप्र ४ अर ५ द्रुत ६ ॥ ६४ ॥ सत्वर ७ चपल ८ तूर्ण ९ अविलंबित १० आशु ११ ।

सततानारताश्रान्तसंतताविरतानिशम् ॥ ६५ ॥ नित्यानवरताजस्रमप्य—

निरन्तरके नाम ९--सतत १ अनारत २ अश्रान्त ३ सन्तत ४ अविरत ५ अनिश ६ ॥ ६५ ॥ नित्य ७ अनवरत ८ अजस्र ९ ॥--

--थातिशयो भरः । अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् । ॥ ६६ ॥ तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ।

वारंवारके नाम १४—अतिशय १ भर २ अतिवेल ३ भृश ४ अत्यर्थ ५ अतिमात्र ६ उद्गाढ७ निर्भर ८॥६६॥ तीव्र ९ एकान्त १० नितान्त ११ गाढ १२ बाढ १३ दृढ १४ ॥

क्लीबे शीघ्राद्यसत्त्वे स्यात्रिष्वेषां सत्त्वगामि यत् ॥ ६७ ॥

अद्रव्यवाची शीघ्र आदि शब्द नपुंसक लिङ्गमें होते हैं और द्रव्यवाची तीनों लिंगोंमें होते हैं ॥ ६७ ॥

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः । मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥ किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः । यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ ६९ ॥

कुबेरके नाम १७—कुबेर १ त्र्यम्बकसख २ यक्षराज् ३ गुह्यकेश्वर ४ मनुष्यधर्मन् ५ धनद ६ राजराज ७ धनाधिप ८ ॥ ६८ ॥ किन्नरेश ९ वैश्रवण १० पौलस्त्य ११ नरवाहन १२ यक्ष १३ एकपिंग १४ ऐलविल १५ श्रीद १६ पुण्यजनेश्वर १७ ॥ ६९ ॥

अस्योद्यानं चैत्ररथम्—

कुबेरके बगीचेका नाम १—चैत्ररथ॥-

—पुत्रस्तु नलकूबरः ।

कुबेरके पुत्रका नाम १—नलकूबर१।

कैलासस्थान—

कुबेरके स्थानका नाम१—कैलास१।

—मलका पू—

कुबेरकी पुरीका नाम १—अलका १।—

विमानं तु पुष्पकम् ॥ ७० ॥

कुबेरके विमानका नाम १—पुष्पक १ ॥ ७० ॥

स्यात्किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः ।

किन्नरोंके नाम ४--किन्नर १ किम्पुरुष २ तुरंगवदन ३ मयु ४ ॥

निधिर्ना शेवधि--

खजानेके नाम २--निधि १ शेवधि २ ॥--

--भेदाः पद्मशङ्खादयो निधेः ॥७१॥

खजानेके भेद- पद्म, शङ्ख इत्यादि ॥ ७१ ॥

इति स्वर्गवर्गः ॥ १ ॥

अथ व्योमवर्गः २.

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् । नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥ वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी । विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ॥ २ ॥

आकाशके नाम १९-द्यो १ दिव् २ अभ्र ३ व्योमन् ४ पुष्कर ५ अम्बर ६ नभस् ७ अन्तरिक्ष ८ गगन ९ अनंत १० सुरवर्त्मन् ११ ख १२ ॥१॥ वियत् १३ विष्णुपद १४ आकाश १५ विहायस् १६ विहायस १७ नाक १८ द्युस् १९ ॥ २ ॥

इति व्योमवर्गः ॥ २ ॥

अथ दिग्वर्गः ३.

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।

दिशाओंके नाम ५--दिश् १ ककुभ् २ काष्ठा ३ आशा ४ हरित्५॥

प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥ उत्तरा-दिगुदीची स्याद्-

पूर्व दिशाका नाम १--प्राची १ । दक्षिण दिशाका नाम १--अवाची १ । पश्चिमदिशाका नाम १-प्रतीची १ ॥१॥ उत्तरदिशाका नाम १--उदीची । १ ।

--दिश्यं तु त्रिषु दिग्भवे ।

दिशोत्पन्नवस्तुका नाम १--दिश्य १ ।--

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥ कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ।

पूर्व दिशाके स्वामीका नाम--इन्द्र १ । अग्निकोणके स्वामीका नाम--वह्नि १ । दक्षिणदिशाके स्वामीका नाम--यमराज १ । नैर्ऋत्य कोणके स्वामीका

---

१ "पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुंदनीलाश्च खर्वश्च निधयो नव ॥" इति शब्दार्णवः। भाषाः--पद्म १ महापद्म २ शंख ३ मकर ४ कच्छप ५ मुकुन्द ६ कुन्द ७ नील ८ खर्व ९ यह नौ खजानेके भेद हैं।

नाम-नैर्ऋत १ । पश्चिमदिशाके स्वामीका नाम-वरुण १ । वायुकोणके स्वामीका नाम-पवन १ ॥ २॥ उत्तर दिशाके स्वामीका नाम-कुबेर १ । ईशान कोणके स्वामीका नाम-ईश १।

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥ पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

पूर्व दिशाके हस्तीका नाम-ऐरावत १ । अग्निकोणके हस्तीका नाम-पुण्डरीक २ । दक्षिण दिशाके हस्तीका नाम-वामन ३ । नैर्ऋत कोणके हस्तीका नाम-कुमुद ४ । पश्चिम दिशाके हस्तीका नाम-अञ्जन ५ । ॥ ३ ॥ वायु कोणके हस्तीका नाम-पुष्पदन्त ६ । उत्तरदिशाके हस्तीका नाम-सार्वभौम ७ । ईशान कोणके हस्तीका नाम-सुप्रतीक ८ ।

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥ ४ ॥ ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।

ऊपर लिखे हुए ऐरावत आदि आठ हस्तियोंकी हथिनियोंके क्रमसे नाम-अभ्रमु १ कपिला २ पिंगला ३ अनुपमा ४ ॥ ४ ॥ ताम्रकर्णी ५ शुभ्रदन्ती ६ अंगना ७ अञ्जनावती ८ ।

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥ ५ ॥

अग्नि आदि कोणके नाम २-अपदिश १ विदिश् २ ॥ ५ ॥ .

अभ्यन्तरं त्वन्तरालं-

बीचभागके नाम २-अभ्यंतर १ अन्तराल २ ।-

-चक्रवालं तु मण्डलम् ।

गोलाकार समूहके नाम २-चक्रवाल १ मण्डल २ ।

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥ धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् । घनजीमूतमुदिरजलमुग्धूमयोनयः ॥७॥

बादलके नाम १५-अभ्र १ मेघ २ वारिवाह ३ स्तनयित्नु ४ बलाहक ५ ॥ ६ ॥ धाराधर ६ जलधर ७ तडित्वत् ८ वारिद ९ अम्बुभृत् १० घन ११ जीमूत १२ मुदिर १३ जलमुच् १४ धूमयोनि १५ ॥ ७ ॥

कादम्बिनी मेघमाला-

मेघपंक्तिके नाम २-कादम्बिनी १ मेघमाला २ ॥-

त्रिषु मेघभवेऽभ्रियम् ।

मेघोत्पन्न वस्तुका नाम १-अभ्रिय १

स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ८ ॥

गर्जनेके नाम ४—स्तनित १ गर्जित २ मेघनिर्घोष ३ रसित ४ ॥ ८ ॥

शम्पाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा । तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥ ९ ॥

बिजलीके नाम १०—शम्पा १ शतह्रदा २ ह्रादिनी ३ ऐरावती ४ क्षणप्रभा ५ तडित् ६ सौदामनी ७ विद्युत् ८ चञ्चला ९ चपला १० ॥९॥

स्फूर्जथुर्वज्रनिर्घोषो—

वज्रके शब्दोंके नाम २—स्फूर्जथु १ वज्रनिर्घोष २ ।—

—मेघज्योतिरिरंमदः ।

वज्रके अग्निके नाम २—मेघज्योतिष् १ । इरम्मद २ ।

—इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ॥ १० ॥

इन्द्रधनुषके नाम ३--इन्द्रायुध १ शक्रधनुष् २ रोहित ३ । सरल इंद्रधनुषका नाम रोहित है ॥ १० ॥

वृष्टिर्वर्ष—

वर्षाके नाम २—वृष्टि १ वर्ष २ ।—

--तद्विघातेऽवग्राहावग्रहौ समौ ।

झूराके नाम २—अवग्राह १ अवग्रह २ ॥

धारासंपात आसारः—

निरन्तर मेघधाराके नाम २--धारासम्पात १ आसार २ ।--

--शीकरोऽम्बुकणाः स्मृताः ११ ॥

वायुसे उड़ाये हुए जलकणों (फुहारों) का नाम १-शीकर १ ॥ ११ ॥

वर्षोपलस्तु करका—

आकाशसे गिरे हुए पत्थरोंके नाम २--वर्षोपल १ करका २ ।—

—मेघच्छन्नेऽह्नि दुर्दिनम् ।

मेघसे आच्छादित हुआ दिनरात्रिका नाम १—दुर्दिन १ ॥

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ १२ ॥ अपिधानतिरोधानपिधानाच्छादनानि च ।

झपनाके नाम ८--अन्तर्धा १ व्यवधा २ अन्तर्धि ३ अपवारण ४ ॥ ॥ १२ ॥ अपिधान ५ तिरोधान ६ पिधान ७ आच्छादन ८ ॥

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥ विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः । अब्जो जैवातृकः सोमो ग्लौर्मृगांकः कलानिधिः ॥ १४ ॥ द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

चन्द्रमाके नाम २०--हिमांशु १ चन्द्रमस् २ चन्द्र ३ इन्दु ४ कुमुद-बान्धव ५ ॥ १३ ॥ विधु ६ सुधांशु ७ शुभ्रांशु ८ ओषधीश ९ निशापति १० अब्ज ११ जैवातृक १२ सोम १३ ग्लौ १४ मृगाङ्क १५ कलानिधि १६ ॥ १४ ॥ द्विजराज १७ शशधर १८ नक्षत्रेश १९ क्षपाकर २० ॥

कला तु षोडशो भागो--

चन्द्रमाके १/१६ वें भागका नाम १-कला १ ॥--

--बिम्बोऽस्त्री मण्डलं त्रिषु॥१५॥

चन्द्रमण्डलके नाम २--बिम्ब १ मण्डल २ ॥ १५ ॥

भित्तं शकलखण्डे वा पुंस्यर्धो-

ग्रासखण्डके नाम ४--भित्त १ शकल २ खण्ड ३ अर्द्ध ४ (पुँल्लिंग) ॥--

--ऽर्धं समेंऽशके ।

समभागका नाम १--अर्द्ध १ (नपुंसकलिंग) ॥

चन्द्रिका कौमुदी ज्योत्स्ना--

चांदनीके नाम ३--चन्द्रिका १ कौमुदी २ ज्योत्स्ना ३॥--

--प्रसादस्तु प्रसन्नता ॥ १६ ॥

निर्मलताके नाम २--प्रसाद १ प्रसन्नता २ ॥ १६ ॥

कलंकाङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

-- चिह्नके नाम ६--कलंक १ अंक २ लाञ्छन ३ चिह्न ४ लक्ष्मन् ५ लक्षण ६॥

सुषमा परमा शोभा--

अति शोभाका नाम १--सुषमा १--

-शोभा कान्तिर्द्युतिश्छविः॥१७॥

शोभाके नाम ४--शोभा १--कांति २ द्युति ३ छवि ४ ॥ १७ ॥

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका चा--

पालेके नाम ७--अवश्याय १ नीहार २ तुषार ३ तुहिन ४ हिम ५ प्रालेय ६ मिहिका ७ ॥--

--थ हिमानी हिमसंहतिः ॥१८॥

पालेके समूहके नाम २--हिमानी १ हिमसंहति २ ॥ १८ ॥

शीतं गुणे--

शीतलताका नाम १--शीत १ ॥--

-तद्वदर्थाः सुषीमः शिशिरो जडः। तुषारः शीतलः शीतो हिमः सप्तान्यलिंगकाः ॥ १९ ॥

शीतलवस्तुके नाम ७–सुषीम १ शिशिर २ जड ३ तुषार ४ शीतल ५ शीत ६ हिम ७ ॥ १९ ॥

ध्रुव औत्तानपादिः स्या-

ध्रुवजीके नाम २–ध्रुव १ औत्तानपादि २ ॥

–दगस्त्यः कुम्भसम्भवः । मैत्रावरुणि–

अगस्त्यके नाम ३–अगस्त्य १ कुम्भसम्भव २ मैत्रावरुणि ३ ॥–

रस्यैव लोपामुद्रा सधर्मिणी २०

अगस्त्यकी स्त्रीका नाम १–लोपामुद्रा १ ॥ २० ॥

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।

नक्षत्रोंके नाम ६–नक्षत्र १ ऋक्ष २ भ ३ तारा ४ तारका ५ उडु ६॥

दाक्षायण्योऽश्विनीत्यादितारा–

अश्विनी आदि २८ नक्षत्रोंका नाम १–दाक्षायणी १ ।–

––अश्वयुगश्विनी ॥ २१ ॥

अश्विनी नक्षत्रके नाम २–अश्वयुज् १ अश्विनी २ ॥ २१ ॥

राधा विशाखा–

विशाखानक्षत्रके नाम २–राधा १ विशाखा २ ॥–

–पुष्ये तु सिध्यतिष्यौ–

पुष्यनक्षत्रके नाम ३–पुष्य १ सिध्य २ तिष्य ३ ॥–

–श्रविष्ठया । समा धनिष्ठा–

धनिष्ठानक्षत्रके नाम २–श्रविष्ठा १ धनिष्ठा २ ॥–

–स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ॥ २२ ॥

पूर्वभाद्रपदा और उत्तरभाद्रपदा नक्षत्रोंके नाम २–प्रोष्ठपदा १ भाद्रपदा २ ॥ २२ ॥

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।

मृगशिरनक्षत्रके नाम ३–मृगशीर्ष १ मृगशिर २ आग्रहायणी ३ ॥

इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥ २३ ॥

मृगशिरके मस्तकपर रहनेवाले नक्षत्रोंका नाम १–इल्वल १ ॥ २३ ॥

बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः । जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥२४॥

बृहस्पतिके नाम ९—बृहस्पति १ सुराचार्य २ गीष्पति ३ धिषण ४ गुरु ५ जीव ६ आंगिरस ७ वाचस्पति ८ चित्रशिखण्डिज ९ ॥ २४ ॥

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।

शुक्रके नाम ६—शुक्र १ दैत्यगुरु २ काव्य ३ उशनस् ४ भार्गव ५ कावि ६ ॥

अंगारकः कुजो भौमो लोहितांगो महीसुतः ॥ २५ ॥

मंगलके नाम ५—अङ्गारक १ कुज २ भौम ३ लोहितांग ४ महीसुत ५ ॥ २५ ॥

रौहिणेयो बुधः सौम्यः—

बुधके नाम ३—रौहिणेय १ बुध २ सौम्य ३ ॥—

—समौ सौरिशनैश्चरौ ।

शनिके नाम २—सौरि १ शनैश्चर २॥

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥ २६ ॥

राहुके नाम ५—तमस् १ राहु २ स्वर्भानु ३ सैंहिकेय ४ विधुन्तुद ५ ॥ २६ ॥

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।

मरीचि अत्रि आदि सप्तर्षियोंके नाम—चित्रशिखण्डिन् ॥ १ ॥

राशीनामुदयो लग्नं—

राशियोंके उदयका नाम १—लग्न १—

—ते तु मेषवृषादयः ॥ २७ ॥

राशियोंके नाम—मेष १ वृष २ आदि ॥ २७ ॥

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः । भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥ २८ ॥ भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः । विकर्तनार्कमार्त्तण्डमिहिरारुणपूषणः ॥२९॥ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः । विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३० ॥ भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।

सूर्यके नाम ३७—सूर १ सूर्य २ अर्य्यमन् ३ आदित्य ४ द्वादशात्मन् ५ दिवाकर ६ भास्कर ७ अहस्कर ८ ब्रध्न ९ प्रभाकर १० विभा—

---

१ " मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखंडिनः " ॥ १ ॥ भाषा—मरीचि १ अंगिरस २ अत्रि ३ पुलस्त्य ४ पुलह ५ क्रतु ६ वसिष्ठ ७ यह सप्तर्षि चित्रशिखण्डि कहलाते हैं ।

कर ११ ॥२८॥ भास्वत् १२ विवस्वत् १३ सप्ताश्व १४ हरिदश्व १५ उष्णरश्मि १६ विकर्त्तन १७ अर्क १८ मार्तण्ड १९ मिहिर २० अरुण २१ पूषन् २२ ॥ २९ ॥ द्युमणि २३ तरणि २४ मित्र २५ चित्रभानु २६ विरोचन २७ विभावसु २८ ग्रहपति २९ त्विषाम्पति ३० अहर्पति ३१ ॥ ॥ ३० ॥ भानु ३२ हंस ३३ सहस्रांशु ३४ तपन ३५ सवितृ ३६ रवि ३७ ॥

माठरः पिंगलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥ ३१ ॥

सूर्यपार्श्ववर्ती तीनोंके एक एक नाम—माठर १ पिंगल २ दण्ड ३ ॥ ३१ ॥

सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ।

सूर्यके सारथिके नाम ५—सूरसूत १ अरुण २ अनूरु ३ काश्यपि ४ गरुडाग्रज ५ ॥

परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३२ ॥

सूर्यके मण्डलके अर्थात् जो कभी २ उनके चारों ओर घेरासा बन जाता है उसके नाम ४—परिवेष १ परिधि २ उपसूर्यक ३ मण्डल ४ ॥ ३२ ॥

किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः।भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥ ३३ ॥

सूर्यके किरणके नाम ११—किरण १ उस्र २ मयूख ३ अंशु ४ गभस्ति ५ घृणि ६ रश्मि ७ भानु ८ कर ९ मरीचि १० दीधिति ११ ॥ ३३ ॥

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः । रोचिःशोचिरुभे क्लीबे—

दीप्तिके नाम ११—प्रभा १ रुच् २ रुचि ३ त्विष् ४ भा ५ भास् ६ छवि ७ द्युति ८ दीप्ति ९ रोचिष् १० शोचिष् ११ ॥—

—प्रकाशो द्योत आतपः ॥३४॥

धूपके नाम ३—प्रकाश १ द्योत २ आतप ३ ॥ ३४ ॥

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।

थोड़े गरमके नाम ४—कोष्ण १ कवोष्ण २ मन्दोष्ण ३ कदुष्ण ४ ॥

तिग्मं तीक्ष्णं खरं तद्व—

बहुत गरमके नाम ३—तिग्म १ तीक्ष्ण २ खर ३ ॥—

—न्मृगतृष्णा मरीचिका ॥३५॥

मृगतृष्णाके नाम २—मृगतृष्णा १ मरीचिका २ ॥ ३५ ॥

इति दिग्वर्गः ॥ ३ ॥

अथ कालवर्गः ४.

कालो दिष्टोऽप्यनेहापि समयो-

समयके नाम ४—काल १ दिष्ट २ अनेहस् ३ समय ४ ॥—

—ऽप्यथ पक्षतिः । प्रतिपद्

द्वे इमे स्त्रीत्वे—

प्रतिपदाके नाम २—पक्षति १ प्रतिपत् २ ॥-स्त्री ४

तदाद्यास्तिथयो द्वयोः ॥ १ ॥

प्रतिपदादिका नाम १—तिथि १॥१॥

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।

दिनके नाम ५—घस्र १ दिन २ अहन् ३ दिवस ४ वासर ५—

प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥ प्रभातं च—

प्रातःकालके नाम ६—प्रत्यूष १ अहर्मुख २ कल्य ३ उषस् ४ प्रत्युषस् ५ ॥ २ ॥ प्रभात ६ ॥—

—दिनान्ते तु सायंसंध्या पितृप्रसूः ।

सायंकालके नाम ४—दिनान्त १ सायम् २ सन्ध्या ३ पितृप्रसू ४ ॥

प्राह्णापराह्णमध्याह्नास्त्रिसंध्य—

प्रातःकालका नाम १ प्राह्ण १ ॥ मध्याह्नकालका नाम १—मध्याह्न १ ॥ मध्याह्नोत्तर कालका नाम १—अपराह्ण १—इन तीनों कालोंका इकट्ठा नाम—त्रिसंध्य १॥—

—मथ शर्वरी ॥ ३ ॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा । विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ ४ ॥

रात्रिके नाम १२—शर्वरी १—॥ ३ ॥ निशा २ निशीथिनी ३ रात्रि ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२ ॥ ४ ॥

तमिस्रा तामसी रात्रि—

अंधियारी रात्रिका नाम १—तमिस्रा १॥

—ज्यौत्स्नी चन्द्रिकयान्विता ।

उजियाली रात्रिका नाम नाम १—ज्यौत्स्नी १॥

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ ५ ॥

वर्तमान और आगन्तुक दिनोंके मध्यकी रात्रिका नाम १—पक्षिणी १॥५॥

गणरात्रं निशा बह्वयः—

बहुत रात्रियोंका नाम १—गणरात्र १ ॥

—प्रदोषो रजनीमुखम् ।

रात्रिके प्रथमभागके नाम २—प्रदोष १ रजनीमुख २ ॥

अर्धरात्रनिशीथौ द्वौ—

आधीरात्रिके नाम २—अर्धरात्र १ निशीथ २ ॥

—द्वौ यामप्रहरौ समौ ॥ ६ ॥

—प्रहरके नाम २—याम १ प्रहर २ ॥ ६ ॥

स पर्वसंधिः प्रतिपत्पञ्चदश्यो-र्यदन्तरम् ।

प्रतिपदा १ और पंचदशी १५।३० के मध्यके कालका नाम १-पर्वसान्धि १ ॥

पक्षान्तौ पञ्चदश्यौ द्वे—

अमावास्या और पूर्णिमाका नाम १—पक्षान्त १ ॥

—पौर्णमासी तु पूर्णिमा ॥ ७ ॥

पूर्णिमाके नाम २—पौर्णमासी १ पूर्णिमा २ ॥ ७ ॥

कलाहीने सानुमतिः—

जिस पूर्णमासीमें प्रतिपदाके योगसे चन्द्रमाकी कला हीन हो उसका नाम १—अनुमति १ ॥

—पूर्णे राका निशाकरे ।

जिसमें पूर्ण चन्द्रमा हो उस पूर्णिमाका नाम १—राका १ ॥

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥ ८ ॥

अमावास्याके नाम ४—अमावास्या १ अमावस्या २ दर्श ३ सूर्येन्दु-संगम ४ ॥ ८ ॥

सा दृष्टेन्दुः सिनीवाली—

जिसमें चतुर्दशीके योगसे चन्द्रमाका दर्शन हो उस अमावास्याका नाम १—सिनीवाली १ ॥

—सा नष्टेन्दुकला कुहूः ।

जिसमें बिलकुल चन्द्रदर्शन न हो उस अमावस्याका नाम १—कुहू १ ॥

उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ ९ ॥ सोपप्लवो-परक्तौ द्वा—

चन्द्रग्रहण और सूर्यग्रहणके नाम ४—उपराग १ ग्रह २ ॥ ९ ॥ सोपप्लव ३ उपरक्त ४ ।

—वग्न्युत्पात उपाहितः ।

धूम्रकेतुके नाम २—अग्न्युत्पात १ उपाहित २ ॥

एकयोक्त्या पुष्पवन्तौ दिवा-करनिशाकरौ ॥ १० ॥

सूर्य और चन्द्र दोनोंका इकट्ठा नाम १—पुष्पवन्त १ ॥ १० ॥

अष्टादश निमेषास्तु काष्ठा—

पलक मारनेका नाम १—निमेष १ ॥ अठारह निमेषोंका नाम १—काष्ठा १ ॥

—त्रिंशत्तु ताः कला ।

तीस काष्ठाओंका नाम १—कला १ ॥

तास्तु त्रिंशत्क्षण-

तीस कलाओंका नाम १—क्षण १ ॥

—स्ते तु मुहूर्तो द्वादशास्त्रियाम् ११

बारह क्षणोंका नाम १—मुहूर्त्त १ ॥११॥

ते तु त्रिंशदहोरात्रः—

तीस मुहूर्तोंका नाम १—अहोरात्र १ ॥

—पक्षस्ते दशपञ्च च ।

पंद्रह दिनरातका नाम १—पक्ष १ ॥

पक्षौ पूर्वापरौ शुक्लकृष्णौ—

पक्ष दो हैं २—शुक्ल १ कृष्ण २ ॥

—मासस्तु तावुभौ ॥ १२ ॥

दो पक्षोंका नाम १—मास १॥ १२ ॥

द्वौ द्वौ मार्गादिमासौ स्यादृतु-

मार्गशीर्षादि दो दो मासोंका नाम १—ऋतु १ ॥

—स्तैरयनं त्रिभिः ।

तीन ऋतुओंका नाम १—अयन १ ॥

अयने द्वे गतिरुदग्दक्षिणार्कस्य-

दो अयनोंके २ भेद—उत्तरायण १। दक्षिणायन २ ॥

—वत्सरः ॥ १३ ॥

दो अयनोंका नाम १—वत्सर १॥१३॥

समरात्रिन्दिवे काले विषुवद्वि-षुवं च तत् ।

जिसमें दिनरात समान होते हैं उस संक्रांति (तुला और मेष) के नाम २—विषुवत् १ विषुव २ ॥

मार्गशीर्षे सहा मार्ग आग्रहा-यणिकश्च सः ॥ १४ ॥

अगहन महीनेके नाम ४—मार्ग-शीर्ष १ सहस् २ मार्ग ३ आग्रहा-यणिक ४ ॥ १४ ॥

पौषे तैषसहस्यौ द्वौ—

पूषमासके नाम ३—पौष १ तैष २ सहस्य ३ ।

—तपा माघे—

माघमासके नाम २—तपस् १ माघ २ ॥

—ऽथ फाल्गुने । स्यात्तपस्यः फाल्गुनिकः—

फाल्गुनमासके नाम ३—फाल्गुन १ तपस्य २ फाल्गुनिक ३ ॥

स्याच्चैत्रे चैत्रिको मधुः ॥ १५ ॥

चैत्रमासके नाम ३—चैत्र १ चैत्रिक २ मधु ३ ॥ १५ ॥

वैशाखे माधवो राधो—

वैशाखमासके नाम ३—वैशाख १ माधव २ राध ३ ॥

—ज्येष्ठे शुक्र—

ज्येष्ठके नाम २—ज्येष्ठ १ शुक्र २ ॥

—श्शुचिस्त्वयम् । आषाढे—

आषाढमासके नाम २—शुचि १ आषाढ २ ॥

—श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥ १६ ॥

श्रावणमासके नाम ३—श्रावण १ नभस् २ श्रावणिक ३ ॥ १६ ॥

स्युर्नभस्यः प्रौष्ठपदभाद्रभाद्रपदाः समाः ।

भादों मासके नाम ४—नभस्य १ प्रौष्ठपद २ भाद्र ३ भाद्रपद ४ ॥

स्यादाश्विन इषोऽप्याश्वयुजोऽपि-

क्वारमासके नाम ३—आश्विन १ इष २ आश्वयुज ३ ॥

—स्यात्तु कार्त्तिके ॥ १७ ॥ बाहुलोर्जौ कार्त्तिकिको—

कार्तिकमासके नाम ४—कार्तिक १ ॥ १७ ॥ बाहुल २ ऊर्ज ३ कार्तिकिक ४ ॥

—हेमन्तः—

अगहन पूस माससे सिद्ध हुई ऋतुका नाम १—हेमन्त १ ॥

—शिशिरोऽस्त्रियाम् ।

माघ फाल्गुनसे सिद्ध हुई ऋतुका नाम १—शिशिर १ ॥

वसन्ते पुष्पसमयः सुरभि—

चैत्र वैशाखसे सिद्ध ऋतुके नाम ३—वसन्त १ पुष्पसमय २ सुरभि ३ ॥

—ग्रीष्म ऊष्मकः ॥ १८ ॥ निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।

ज्येष्ट आषाढके ऋतुके नाम ७—ग्रीष्म १ ऊष्मक २ ॥१८॥ निदाघ३ उष्णोपगम४ उष्ण५ ऊष्मागम६ तप ७ ॥

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा-

सावन भादोंके ऋतुके नाम २—प्रावट् १ वर्षा २ ॥

—अथ शरत् स्त्रियाम् ॥ १९ ॥

क्वार कार्तिकके ऋतुका नाम १—शरद् १ ॥ १९ ॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।

मार्गशीर्ष आदि दो दो महीनोंके ये छः ऋतु होते हैं ॥

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ॥ २० ॥

वर्षके नाम ६—संवत्सर १ वत्सर २ अब्द ३ हायन ४ शरद् ५ समा ६ ॥ २० ॥

मासेन स्यादहोरात्रः पैत्रो—

मनुष्योंके एक महीनेका पितरोंका (दिनरात्रि) दिवस होता है ॥

—वर्षेण दैवतः ।

और एक वर्षका देवताओंका (दिनरात्रि) दिवस होता है ॥

दैवे युगसहस्रे द्वे ब्राह्मः–

देवोंके दो हजार युगका ब्रह्माका (दिनरात्रि) दिवस होता है ॥

–कल्पौ तु तौ नृणाम् ॥ २१ ॥

उन दो युगसहस्रोंको मनुष्योंका कल्प कहते हैं, ब्रह्माका दिन मनुष्योंका स्थितिकाल और ब्रह्माकी रात्रि मनुष्योंका प्रलयकाल होता है ॥ २१ ॥

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

इकहत्तर दिव्यवर्षका नाम १–मन्वन्तर १ ॥

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥

प्रलयके नाम ५–संवर्त १ प्रलय २ कल्प ३ क्षय ४ कल्पान्त५॥२२॥

अस्त्री पंकं पुमान्पाप्मा पापं किल्बिषकल्मषम् । कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥ २३॥

पापके नाम १२–पंक १ पाप्मन् २ पाप ३ किल्बिष ४ कल्मष ५कलुष ६ वृजिन ७ एनस् ८ अघ ९ अंहस् १० दुरित ११ दुष्कृत १२ ॥ २३ ॥

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

धर्मके नाम ५–धर्म १ पुण्य २ श्रेयस् ३ सुकृत ४ वृष ५ ॥

मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः ॥ २४ ॥ स्यादानन्दथुरानन्दः शर्मशातसुखानि च ।

हर्षके नाम १२–मुद् १ प्रीति २ प्रमद ३ हर्ष ४ प्रमोद ५ आमोद ६ सम्मद ७ ॥ २४ ॥ आनन्दथु ८ आनन्द ९ शर्मन् १० शात ११ सुख १२ ॥

श्वःश्रेयसं शिवं भद्रं कल्याणं मंगलं शुभम् ॥ २५ ॥ भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् । शस्तं चा–

कल्याणके नाम १२–श्वःश्रेयस् १ शिव २ भद्र ३ कल्याण ४ मंगल ५ शुभ ६ ॥ २५ ॥ भावुक ७ भविक ८ भव्य ९ कुशल १० क्षेम ११ शस्त १२।

–ऽथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥

पाप और पुण्यशब्द तथा सुखशब्द से लेकर शस्तशब्द पर्यंत जो शब्द हैं वे यदि द्रव्यवाचक हों तो तीनों लिंगोंमें होते हैं ॥ २६ ॥

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमू–

अच्छेके नाम ५—मतल्लिका १ मचर्चिका २ प्रकाण्ड ३ उद्ध ४ तल्लज ५ ॥

—न्ययः शुभावहो विधिः ॥२७॥

शुभकारक विधिका नाम—अय १ ॥ २७ ॥

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

भाग्यके नाम ६—दैव १ दिष्ट २ भागधेय ३ भाग्य ४ नियति ५ विधि ६॥

हेतुर्ना कारणं बीजम्—

कारणके नाम ३—हेतु १ कारण २ बीज ३ ॥

—निदानं त्वादिकारणम् ॥२८॥

आदिकारणका नाम १—निदान १॥२८॥

क्षेत्रज्ञ आत्मा पुरुषः—

चैतन्यके नाम ३—क्षेत्रज्ञ १ आत्मन् २ पुरुष ३ ॥

—प्रधानं प्रकृतिः स्त्रियाम् ।

प्रकृतिके नाम २—प्रधान १ प्रकृति २ ॥

विशेषः कालिकोऽवस्था—

उमरका नाम १—अवस्था १ ।

—गुणाः सत्त्वं रजस्तमः ॥२९॥

गुणोंके नाम ३—सत्त्व १ रजस् २ तमस् ३ ॥ २९ ॥

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ॥

जन्मके नाम ६—जनुस् १ जनन २ जन्मन् ३ जनि ४ उत्पत्ति ५ उद्भव ६ ॥

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

प्राणीके नाम ६—प्राणिन् १ चेतन २ जन्मिन् ३ जन्तु ४ जन्यु ५ शरीरिन् ६ ॥ ३० ॥

जातिर्जातं च सामान्यं—

जातिमात्रके नाम ३—जाति १ जात २ सामान्य ३ ॥

—व्यक्तिस्तु पृथगात्मता ।

व्यक्तिवाचकके नाम २—व्यक्ति १ पृथगात्मता २ ॥

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

मनके नाम ७—चित्त १ चेतस् २ हृदय ३ स्वान्त ४ हृद् ५ मानस ६ मनस् ७ ॥ ३१ ॥

इति कालवर्गः ॥ ४ ॥

अथ धीवर्गः ५.

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः । प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥

बुद्धिके नाम १४—बुद्धि १ मनीषा २ धिषणा ३ धी ४ प्रज्ञा ५

शेमुषी ६ मति ७ प्रेक्षा ८ उपलब्धि ९ चित् १० संविद् ११ प्रतिपद् १२ ज्ञप्ति १३ चेतना १४ ॥ १ ॥

धीर्धारणावती मेधा-

कही हुई वार्त्ताको धारण रखनेवाली बुद्धिका नाम १-मेधा १ ॥

-संकल्पः कर्म्म मानसम् ।

मनकी कामनाका नाम १-संकल्प १ ॥

चित्ताभोगो मनस्कार-

किसी वस्तुमें चित्तके तत्पर हो जानेके नाम २-चित्ताभोग १ मनस्कार २॥

-श्चर्चा संख्या विचारणा ॥२॥

विचारके नाम ३-चर्चा १ संख्या २ विचारणा ३ ॥ २ ॥

अध्याहारस्तर्क ऊहो-

अपूर्व विचारके नाम ३-अध्याहार १ तर्क २ ऊह ३ ॥

-विचिकित्सा तु संशयः । संदेहद्वापरौ चा-

सन्देहके नाम ४-विचिकित्सा १ संशय २ संदेह ३ द्वापर ४ ॥

-थ समौ निर्णयनिश्चयौ॥ ३ ॥

निश्चयके नाम २-निर्णय १ निश्चय २ ॥ ३ ॥

मिथ्यादृष्टिर्नास्तिकता-

परलोकको मिथ्या जाननेके नाम २-मिथ्यादृष्टि १ नास्तिकता २ ॥

व्यापादो द्रोहचिन्तनम् ।

परद्रोहके नाम २-व्यापाद १ द्रोहचिन्तन २ ॥

समौ सिद्धान्तराद्धान्तौ-

निश्चय की हुई बातके नाम २-सिद्धान्त १ राद्धान्त २ ॥

-भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥४॥

भ्रमके नाम ३-भ्रान्ति १ मिथ्यामति २ भ्रम ३ ॥ ४ ॥

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ॥ अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

प्रतिज्ञाके नाम १०-संविद् १ आगू २ प्रतिज्ञान ३ नियम ४ आश्रव ५ संश्रव ६ अङ्गीकार ७ अभ्युपगम ८ प्रतिश्रव ९ समाधि १० ॥ ५ ॥

मोक्षे धीर्ज्ञान-

मोक्षमें बुद्धि लगानेका नाम १-ज्ञान १ ॥

-मन्यत्र विज्ञानं शिल्पशास्त्रयोः ।

मोक्षसे अन्यत्र शिल्पविद्या और शास्त्रमें बुद्धि लगानेका नाम-१ विज्ञान १ ॥

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥ मोक्षोऽपवर्गो-

मोक्षके नाम ८–मुक्ति १ कैवल्य २ निर्वाण ३ श्रेयस् ४ निःश्रेयस् ५ अमृत ६ ॥ ६ ॥ मोक्ष ७ अपवर्ग ८ ॥

–थाज्ञानमविद्याहंमतिः स्त्रियाम् ।

अज्ञानके नाम ३–अज्ञान १ अविद्या २ अहम्मति ३ ॥

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥

पञ्चविषयोंके नाम ५–रूप १ शब्द २ गन्ध ३ रस ४ स्पर्श ५॥७॥

गोचरा इन्द्रियार्थाश्च-

इकट्ठे रूपरसादिके नाम ३–विषय १ गोचर २ इन्द्रियार्थ ३ ॥

–हृषीकं विषयीन्द्रियम् ।

इन्द्रियके नाम ३–हृषीक १ विषयी २ इन्द्रिय ३ ॥

कर्मेन्द्रियं तु पाय्वादि-

कर्मेंद्रियोंके नाम–गुदी आदि ॥[1]

–मनोनेत्रादि धीन्द्रियम् ॥८॥

ज्ञानेंद्रियोंके नाम–५ मनस् १ नेत्र २ आदि[1] ॥ ८ ॥

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः । तिक्तोऽम्लश्च रसाः पुंसि--

छः रसोंके नाम–तुवर–कषाय १ मधुर २ लवण ३ कटु ४ तिक्त ५ अम्ल ६ ॥

–तद्वत्सु षडमी त्रिषु ॥ ९ ॥

कषाय आदि रसवाचक शब्द यदि द्रव्यवाचक हों तो तीनों लिंगोंमें होते हैं ॥ ९ ॥

विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।

मनुष्योंके मनको हरनेवाले घिसनेसे उत्पन्न हुए सुगन्धका नाम १–परिमल १

आमोदः सोऽतिनिर्हारी-

अत्यन्त मनको हरनेवाले सुगंधका नाम १–आमोद १ ॥

–वाच्यलिंगत्वमागुणात् ॥१०॥

यहांसे लेकर "गुणे शुक्लादयः पुंसि" इससे पहले जो शब्द हैं वे वाच्यलिङ्ग अर्थात् विशेष्यलिंग होते हैं ॥ १० ॥

---

१ "पायूपस्थे पाणिपादा वाक्चेतीन्द्रियसंग्रहः ।" अर्थात्–पायु १ उपस्थ २ पाणि३ पाद४ और वाक् ५ यह पांच कर्मेन्द्रिय हैं ॥

१ "मनः कर्णस्तथा नेत्रं रसना च त्वचा सहानासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥" अर्थात्–मन१कर्ण २ नेत्र ३ जिह्वा ४ त्वचा५और नासिका यह ६ ज्ञानेन्द्रिय (धीन्द्रिय) हैं ॥

समाकर्षी तु निर्हारी-

दूरसे ही जिसकी गन्ध आवे उसके नाम २--समाकर्षिन् १ निर्हारिन् २ ॥

--सुरभिर्घ्राणतर्पणः । इष्टगन्धः सुगन्धिः स्या-

अत्युत्तमगन्धके नाम ४--सुरभि १ घ्राणतर्पण २ इष्टगन्ध ३ सुगंधि ४ ॥

-दामोदी मुखवासनः ॥ ११॥

मुखको सुगंधित करनेवाले ताम्बूले आदिकी गंधके नाम २--आमोदिन् १ मुखवासन २ ॥ ११ ॥

पूतिगन्धिस्तु दुर्गन्धो-

दुर्गन्धके नाम २--पूतिगन्धि १ दुर्गन्ध २ ॥

--विस्रं स्यादामगन्धि यत् ।

कच्चे मांसादिके गन्धका नाम १--विस्र १ ॥

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥ अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।

पयस्यमाज्यदध्यादि–

घृत दही आदिका नाम १–पयस्य १॥

–द्रप्सं दधि घनेतरत् ॥ ५१ ॥

पतले दहीका नाम १–द्रप्स १॥५१॥

घृतमाज्यं हविः सर्पिः–

घीके नाम ४–घृत १ आज्य २ हविष् ३ सर्पिष् ४ ॥

–नवनीतं नवोद्धृतम् ।

मक्खनके नाम २–नवनीत १ नवोद्धृत २ ॥

तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतम् ॥ ५२ ॥

नौनींघीका नाम १–हैयङ्गवीन १ ॥ ५२ ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

मट्ठेके नाम ४–दण्डाहत १ कालशेय २ अरिष्ट ३ गोरस ४ ॥

तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

मट्ठेके भेद ३–तक्र १ उदश्वित २ मथित ३ ॥ ५३ ॥

मण्डं दधिभवं मस्तु–

दहीके पानीका नाम १—मस्तु १ ॥

—पीयूषोऽभिनवं पयः ।

खीसका नाम १—पीयूष १ ॥

अशनाया बुभुक्षा क्षुद्-

भूखके नाम ३—अशनाया १ बुभुक्षा २ क्षुध् ३ ॥

—ग्रासस्तु कवलः पुमान् ॥५४॥

ग्रासके नाम २—ग्रास १ कवल २ ॥ ५४ ॥

सपीतिः स्त्री तुल्यपानं—

साथ पीनेके नाम २—सपीति १ तुल्यपान २ ॥

—सग्धिः स्त्री सहभोजनम् ।

एकसाथ भोजन करनेके नाम २—सग्धि १ सहभोजन २ ॥

उदन्या तु पिपासा तृट् तर्षो—

प्यासके नाम ४—उदन्या १ पिपासा २ तृष् ३ तर्ष ४ ॥

—जग्धिस्तु भोजनम् ॥ ५५ ॥ जेमनं लेह आहारो निघासो न्याद इत्यपि ॥

भोजनके नाम ७—जग्धि १ भोजन २ ॥ ५५ ॥ जेमन ३ लेह ४ आहार ५ निघास ६ न्याद ७ ॥

सौहित्यं तर्पणं तृप्तिः—

तृप्तिके नाम ३—सौहित्य १ तर्पण २ तृप्ति ३ ॥

—फेला भुक्तसमुज्झितम् ॥५६॥

भोजन करके त्यागी हुई वस्तुका नाम १—फेला १ ॥ ५६ ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

इच्छाके नाम ६—काम १ प्रकाम २ पर्याप्त ३ निकाम ४ इष्ट ५ यथेप्सित ६ ॥

गोपगोपालगोसंख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥

अहीरके नाम ६—गोप १ गोपाल २ गोसंख्य ३ गोदुह् ४ आभीर ५ बल्लव ६ ॥ ५७ ॥

गोमहिष्यादिकं पादबन्धनं—

घरमें बांधने लायक गाय भैंस आदिका नाम १—पादबन्धन १ ॥

—द्वौ गवीश्वरे । गोमान्गोमी—

गायके मालिकके नाम ३—गवीश्वर १ गोमत् २ गोमिन् ३ ॥

गोकुलं तु गोधनं स्याद्गवां व्रजे ॥ ५८ ॥

गायोंके समूहके नाम २—गोकुल १ गोधन २ ॥ ५८ ॥

त्रिष्वाशितं गवीनं तद्गावो यत्राशिताः पुरा ।

जहां गैयाँ आदिको पहिले खिलाया

गया हो उस स्थानका नाम १—आसितंगवीन १ ॥

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥ अनड्वान्सौरभेयो गौ—

बैलके नाम ९—उक्षन् १ भद्र २ बलीवर्द ३ ऋषभ ४ वृषभ ५ वृष ६ ॥५९॥अनडुह् ७ सौरभेय ८ गो ९ ॥

—रुक्षणां संहतिरौक्षकम् ।

बैलोंके समूहका नाम १—औक्षक १॥

गव्या गोत्रा गवाम्—

गावोंके समूहके नाम २—गव्या १ गोत्रा २ ॥

—वत्सधेन्वोर्वात्सकधैनुके ॥६०॥

बछड़ोंके समूहका नाम १—वात्सक १ ॥ धेनुओंके समूहका नाम १—धैनुक १ ॥ ६० ॥

वृषो महान्महोक्षः स्याद्—

बड़े बैलका नाम १—महोक्ष १ ॥

—वृद्धोक्षस्तु जरद्गवः ।

बूढ़े बैलके नाम २—वृद्धोक्ष १ जरद्गव २ ॥

उत्पन्न उक्षा जातोक्षः—

जवान बैलका नाम १—जातोक्ष १॥

—सद्योजातस्तु तर्णकः ॥ ६१ ॥

छोटे बछरेका नाम १—तर्णक १ ॥ ॥ ६१ ॥

शकृत्करिस्तु वत्सः स्याद्—

बछड़ेमात्रके नाम २—शकृत्करि १ वत्स २ ॥

—दम्यवत्सतरौ समौ ।

थोड़े जवान बछड़ेके नाम २—दम्य १ वत्सतर २ ॥

आर्षभ्यः षण्डतायोग्यः—

बधिया करने लायकका नाम १—आर्षभ्य १ ॥

—षण्डो गोपतिरिट्चरः ॥६२॥

सांड़के नाम ३—षण्ड १ गोपति २ इट्चर ३ ॥ ६२ ॥

स्कन्धदेशे त्वस्य वहः—

बैलके कन्धेका नाम १—वह १॥

—सास्ना तु गलकम्बलः ।

गैयोंके गलेमें जो मांस लटकता है उस मांसके नाम २—सास्ना १ गलकम्बल २ ॥

स्यान्नस्तितस्तु नस्योतः—

नाथवाले बैलके नाम २—नस्तित १ नस्योत २ ॥

—प्रष्ठवाड् युगपार्श्वगः ॥६३॥

जिससे गाड़ीमें जोतनेके अर्थ बैल सधाये जायँ उस काष्ठके नाम २—प्रष्ठवाड् १ युगपार्श्वग २ ॥ ६३ ॥

युगादीनां तु वोढारो युग्यमासंग्यशाकटाः ।

जुएके उठानेवालेका नाम १—युग्य १ ॥ जोड़के उठानेवालेका नाम १—प्रासङ्ग्य १ ॥ छकड़ेके उठानेवाले बैलका नाम १—शाकट १ ॥

खनति तेन तद्वोढाऽस्येदं हालिकसैरिकौ ॥ ६४ ॥

हलमें चलनेवालेके नाम २—हालिक १ सैरिक २ ॥ ६४ ॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।

बोझा ढोनेवाले बैलके नाम ५—धूर्वह १ धुर्य्य २ धौरेय ३ धुरीण ४ धुरन्धर ५ ॥

उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

एक बोझेके ढोनेवालेके नाम ३—एकधुरीण १ एकधुर २ एकधुरावह ३ ॥ ६५ ॥

स तु सर्वधुरीणः स्याद्यो वै सर्वधुरावहः ।

जो सब बोझा ले चले उसके नाम २—सर्वधुरीण १ सर्वधुरावह २ ॥

माहेयी सौरभेयी गौरुस्रा माता च शृंगिणी ॥ ६६ ॥ अर्जुन्यघ्न्या रोहिणी स्यात्—

गायके नाम ९—माहेयी १ सौरभेयी २ गो ३ उस्रा ४ माता ५ शृंगिणी ६ ॥ ६६ ॥ अर्जुनी ७ अघ्न्या ८ रोहिणी ९ ॥

—उत्तमा गोषु नैचिकी ।

अच्छी गायका नाम १—नैचिकी ।

वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥ ६७ ॥

चितकबरीका नाम १—शबली १ ॥ सफेदका नाम १—धवला १ ॥ ६७ ॥

द्विहायनी द्विवर्षा गौ—

दो वर्षकी गायके नाम २—द्विहायनी १ द्विवर्षा २ ॥

—रेकाब्दा त्वेकहायनी ।

एकवर्षवालीके नाम २—एकाब्दा १ एकहायनी २ ॥

चतुरब्दा चतुर्हाय—

चार वर्षकीके नाम २—चतुरब्दा १ चतुर्हायणी २ ॥

—ण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

तीन वर्षकी गौके नाम २—त्र्यब्दा १ त्रिहायणी २ ॥ ६८ ॥

वशा वन्ध्या—

बांझके नाम २—वशा १ वन्ध्या १ ॥

—ऽवतोका तु स्रवद्गर्भा—

जिसका अकस्मात् गर्भ गिर गया हो उस गायके नाम २—अवतोका १ स्रवद्गर्भा १ ॥

–थ सन्धिनी । आक्रान्ता वृषभेणा–

बैलके साथ लगाई हुई गायका नाम १–सन्धिनी १ ॥

–थ वेहद्गर्भोपघातिनी ॥ ६९ ॥

बैलके संयोगसे गर्भको गिरा देनेवाली गायके नाम २–वेहत् १ गर्भोपघातिनी ॥ २ ॥ ६९ ॥

काल्योपसर्या प्रजने–

जिसको गर्भ धारण करनेका समय हो उसका नाम १–उपसर्य्या १ ॥

–प्रष्ठौही बालगर्भिणी ।

पहलौनका नाम १–प्रष्ठौही १ ॥

स्यादचण्डी तु सुकरा–

सूधी गौके नाम २–अचण्डी १ सुकरा २ ॥

–बहुसूतिः परेष्टुका ॥ ७० ॥

बहुत दफे ब्याई हुईके नाम २–बहुसूति १ परेष्टुका २ ॥ ७० ॥

चिरप्रसूता बष्कयिणी–

बकेन (बहुत दिनोंमें ब्यानेवाली) गायके नाम २–चिरप्रसूता १ बष्कयिणी २ ॥

–धेनुः स्यान्नवसूतिका ॥

नयी ब्याई हुईके नाम २–धेनु १ नवसूतिका २ ॥

सुव्रता सुखसन्दोह्या–

जो सरलतासे दुही जाय उस गायके नाम २–सुव्रता १ सुखसन्दोह्या २ ॥

पीनोध्नी पीवरस्तनी ॥ ७१ ॥

बड़े आयनवालीके नाम २–पीनोध्नी १ पीवरस्तनी २ ॥ ७१ ॥

द्रोणक्षीरा द्रोणदुग्धा–

द्रोण (१२ सेर) दूध देनेवालीके नाम २–द्रोणक्षीरा १ द्रोणदुग्धा २ ॥

–धेनुष्या बन्धके स्थिता ।

गिरबी रक्खी हुईका नाम १–धेनुष्या १ ॥

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥

प्रतिवर्ष ब्यानेवाली गौका नाम १–समांसमीना १ ॥ ७२ ॥

ऊधस्तु क्लीबमापीनं–

आयन (औहडी) के नाम २–ऊधस् १ आपीन २ ॥

–समौ शिवककीलकौ ।

खूंटेके नाम २–शिवक १ कीलक २ ॥

न पुंसि दाम सन्दानं–

दुहनेके समय पांव बांधनेकी रस्सीके नाम २–दामन् १ सन्दान २ ॥

–पशुरज्जुस्तु दामनी ॥ ७३ ॥

पशु बांधनेकी रस्सीके नाम २–पशुरज्जु १ दामनी २ ॥ ७३ ॥

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके ।

मथनेका दंडा अर्थात् रईके नाम ५–वैशाख १ मन्थ २ मन्थान ३ मथिन् ४ मन्थदण्डक ५ ॥

कुठरो दण्डविष्कम्भो–

जिसमें रई बांधी जाय उस काष्ठके नाम २– कुठर १ दण्डविष्कम्भ २ ॥

–मन्थनी गर्गरी समे ॥ ७४ ॥

मथनेके पात्रके नाम २--मन्थनी १ गर्गरी २ ॥ ७४ ॥

उष्ट्रे क्रमेलकमयमहांगाः–

ऊँटके नाम ४–उष्ट्र १ क्रमेलक २ मय ३ महांग ४ ॥

–करभः शिशुः ।

ऊँटके बच्चेके नाम २--करभ १ शिशु २ ॥

करभाः स्युः शृंखलका दारवैः पादबंधनैः ॥ ७५ ॥

काठसे पैर बँधे हुए बच्चेका नाम १–शृंखलक १ ॥ ७५ ॥

अजा छागी–

बकरीके नाम २–अजा१छागी २॥

शुभ्छागबस्तच्छगलका अजे ।

बकरेके नाम ५--शुभ १ छाग २ वस्त ३ छगलक ४ अज ५ ॥

मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ॥ ७६ ॥

मेढ़ेके नाम ७–मेढ्र १ उरभ्र २ उरण ३ ऊर्णायु ४ मेष ५ वृष्णि ६ एडक ॥ ७ ॥ ७६ ॥

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।

ऊँटोंके समूहका नाम १–औष्ट्रक १ ॥ मेढ़ोंके समूहका नाम १–औरभ्रक १॥अजों (बकरों) के समूहका नाम१– आजक १ ॥

चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः ॥७७ ॥

गधेके नाम ५–चक्रीवत् १ वालेय २ रासभ ३ गर्दभ ४ खर ५ ॥७७॥

वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् । पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः॥ ७८ ॥

व्यापारीके नाम८–वैदेहक १ सार्थवाह२नैगम ३ वाणिज ४ वणिज् ५ पण्याजीव ६ आपणिक ७ क्रयविक्रयिक ८ ॥ ७८ ॥

विक्रेता स्याद्विक्रयिकः–

बेचनेवालेके नाम २–विक्रेतृ १ विक्रयिक २ ॥

–क्रायिकक्रयिकौ समौ ।

मोल लेनेवालेके नाम २–क्रायिक १ क्रयिक २ ॥

वाणिज्यं तु वणिज्या स्या–

व्यापारके नाम २–वाणिज्य १ वणिज्या २ ॥

–न्मूल्यं वस्नोऽप्यवक्रयः ॥७९॥

मोलके नाम ३–मूल्य १ वस्न २ अवक्रय ३ ॥ ७९ ॥

नीवी परिपणो मूलधनं–

मूलधनके नाम ३–नीवी १ परिपण २ मूलधन ३ ॥

–लाभोऽधिकं फलम् ।

नफेके नाम ३–लाभ १ अधिक २ फल ३ ॥

परिदानं परीवर्तो नैमेयानिमयावपि ॥ ८० ॥

अदले बदलेके नाम ४–परिदान १ परीवर्त्त २ नैमेय ३ निमय ४ ॥८०॥

पुमानुपनिधिर्न्यासः–

धरोहरके नाम २–उपनिधि १ न्यास २

–प्रतिदानं तदर्पणम् ।

धरोहर लौटा देनेके नाम २–प्रतिदान १ तदर्पण २ ॥

क्रये प्रसारितं क्रय्यं–

बेचनेके अर्थ दुकानमें रक्खी हुई वस्तुका नाम १–क्रय्य १ ॥

–क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥

दूकानपर रखने योग्य वस्तुका नाम १–क्रेय १ ॥ ८१ ॥

विक्रेयं पणितव्यं च पण्यं–

बेचने योग्य वस्तुके नाम ३–विक्रेय १ पणितव्य २ पण्य ३ ॥

–क्रय्यादयस्त्रिषु ।

क्रय्य आदि शब्द तीनों लिङ्गोंमें होते हैं ॥

क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ॥ ८२ ॥

साई अर्थात् बयानेके नाम ३–सत्यापन १ सत्यङ्कार २ सत्याकृति ३ ॥ ८२ ॥

विपणो विक्रयः–

बेचनेके नाम २–विपण १ विक्रय २।

–संख्याः संख्येये ह्यादश त्रिषु ।

एकसे अष्टादश पर्यंत संख्या गिनने योग्य वस्तुमें रहती है और वह संख्या शब्द संख्येय शब्दवत् तीनों लिङ्गोंमें होती है ॥

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ ८३ ॥

विंशति (बीस) आदि संपूर्ण संख्या (गिनती) और संख्येय अर्थात् गिनने योग्य वस्तुमें रहती है और विंशति आदि शब्द सदा एकवचन होते हैं ॥ ८३ ॥

संख्यार्थे द्विबहुत्वे स्त–

केवल गिनती अर्थवाले विंशति आदि शब्द द्विवचन और बहुवचनमें होते हैं।

-स्तासु चानवतेः स्त्रियः ।

विंशति आदि नवतिपर्यंत शब्द स्त्रीलिंग होते हैं ॥

पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥ ८४ ॥

दश संख्याका क्रमसे उत्तरोत्तर दश गुण शत सहस्र आदि संख्याएँ होती हैं ॥ ८४ ॥

यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।

तोलके नाम ३—यौतव १ द्रुवय २ पाय्य ३ ॥

मानं तुलाऽङ्गुलिप्रस्थै-

(तोल तीन प्रकारकी है) तुलामान १ अंगुलिमान २ प्रस्थमान ३ ॥

-र्गुञ्जाः पञ्चाद्यमाषकः ॥८५॥

पांच रतीका शास्त्रोक्त माषा (मासा) होता है ॥ ८५ ॥

ते षोडशाक्षः कर्षोऽस्त्री-

सोलह मासेका एक अक्ष होता है उसको ही कर्ष कहते हैं ॥

-पलं कर्षचतुष्टयम् ।

चार कर्षका एक पल होता है ॥

सुवर्णबिस्तौ हेम्नोऽक्षे-

कर्षभर सुवर्णके नाम २—सुवर्ण १ बिस्त २ ॥

-कुरुबिस्तस्तु तत्पले ॥ ८६ ॥

पलभर सुवर्णका नाम १—कुरुबिस्त १ ॥ ८६ ॥

तुला स्त्रियां पलशतं-

सौ पलका नाम १—तुला १ ॥

-भारः स्याद्विंशतिस्तुलाः ।

बीस तुलाका नाम १—भार १ ॥

आचितो दश भाराः स्युः-

दशभारका नाम १—आचित १ ॥

-शाकटो भार आचितः ॥८७॥

शकटभर भारका नाम १—आचित ॥ ८७ ॥

कार्षापणः कार्षिकः स्यात्-

चांदीके रुपयेके नाम २—कार्षापण १ कार्षिक २ ॥

-कार्षिके ताम्रिके पणः ।

तामेका कार्षापण अर्थात् पैसेका नाम १—पण १ ॥

अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥ ८८ ॥ कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।

चार सेरका नाम—आढक १ ॥ आठ आढकका नाम—द्रोण १ ॥

तीन द्रोणका नाम—खारी १ ॥ आठ द्रोणका नाम—वाह १ ॥ मुट्ठीभरका नाम—निकुंचक १ ॥ ८८ ॥ पावभरका नाम—कुडव १ ॥ सेरभरका नाम—प्रस्थ १॥ इत्यादि अलग अलग तोलके नाम हैं ॥

पादस्तुरीयो भागः —

चौथे भागका नाम १—पाद १ ॥

—ंशभागौ तु वण्टके ॥ ८९ ॥

बाट अर्थात् भागके नाम ३—अंश १ भाग २ वंटक ३ ॥ ८९ ॥

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु । हिरण्यं द्रविणं द्युम्नमर्थ-रैविभवा अपि ॥ ९० ॥

धनके नाम १३—द्रव्य १ वित्त २ स्वापतेय ३ रिक्थ ४ ऋक्थ ५धन६ वसु ७ हिरण्य ८ द्रविण ९ द्युम्न १०अर्थ ११ रै १२ विभव १३ ॥ ९० ॥

स्यात्कोषश्च हिरण्यं च हेमरूप्ये कृताकृते ।

गड़े वा नहीं गड़े हुए सोने वा चांदीके नाम २—हिरण्य १ कोष २ ॥

ताभ्यां यदन्यत्तत्कुप्यं—

सोने चांदीसे अन्य ताम्रादि धातु-का नाम १—कुप्य १ ॥

—रूप्यं तद्द्वयमाहतम् ॥ ९१ ॥

तांबा और चांदीके मिलाये हुएका नाम १—रूप्य १ ॥ ९१ ॥

गारुत्मतं मरकतमश्मगर्भो हरि-न्मणिः ।

मरकतमणिके नाम ४—गारुत्मत १ मरकत २ अश्मगर्भ ३ हरिन्मणि ४॥

शोणरत्नं लोहितकः पद्मरागो—

पद्मरागमणिके नाम ३—शोणरत्न १ लोहितक २ पद्मराग ३ ॥

—ऽथ मौक्तिकम् ॥ ९२ ॥ मुक्ता—

मोतीके नाम २—मौक्तिक १॥९२॥ मुक्ता २ ॥

—ऽथ विद्रुमः पुंसि प्रवालं पुंन-पुंसकम् ।

मूंगेके नाम २—विद्रुम१ प्रवाल१॥

रत्नं मणिर्द्वयोरश्मजातौ मुक्ता-दिकेऽपि च ॥ ९३ ॥

पद्मराग आदि पाषाण जाति और मुक्ताफल आदिके नाम २—रत्न १ मणि २ ॥ ९३ ॥

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् । तपनीयं शातकुम्भं गांगेयं भर्म कर्बुरम् ॥ ९४ ॥ चामीकरं जातरूपं महारजत-काञ्चने । रुक्मं कार्तस्वरं जाम्बून-

दमष्टापदोऽस्त्रियाम् ॥ ९९ ॥

सुवर्णके नाम १९–स्वर्ण १सुवर्ण२ कनक ३ हिरण्य ४ हेमन् ५हाटक६तप- नीय ७ शातकुम्भ ८गांगेय९भर्म्मन्१० कर्बुर ११ ॥ ९४ ॥ चामीकर १२ जातरूप १३ महारजत१४ कांचन१५ रुक्म १६ कार्त्तस्वर १७ जांबूनद १८ अष्टापद १९ ॥ ९५ ॥

अलंकारसुवर्णं यच्छृङ्गीकनक- मित्यदः ।

सुवर्णके गहनेका नाम १–श्रृगीकनक १

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेत- मित्यपि ॥ ९६ ॥

चांदीके नाम ५–दुर्वर्ण १रजत २ रूप्य ३ खर्जूर ४ श्वेत ५ ॥ ९६ ॥

रीतिः स्त्रियामारकूटो न स्त्रिया–

पीतलके नाम २–रीति १ आरकूट२॥

–मथ ताम्रकम् । शुल्वं म्लेच्छ- मुखं द्व्यष्टवरिष्टोदुम्बराणि च ॥ ९७ ॥

तांबेके नाम ६–ताम्रक १ शुल्व२ म्लेच्छमुख ३ द्व्यष्ट ४ वरिष्ट ५ उदुं- बर ६ ॥ ९७ ॥

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी । अश्मसारो–

लोहेके नाम ७–लोह १ शस्त्रक २ तीक्ष्ण ३ पिण्ड ४ कालायस५ अयस्६ अश्मसार ७ ॥

–थ मण्डूरं सिंहाणमपि तन्मले ॥ ९८ ॥

लोहेके मल अर्थात् मंडूरके नाम२– मण्डूर १ सिंहाण २ ॥ ९८ ॥

सर्वं च तैजसं लोहं–

चांदी सोना लोहादि सर्व धातुओंका नाम १–लोह ॥

विकारस्त्वयसः कुशी ।

लोहेके फालका नाम १–कुशी १॥

क्षारः काचो–

कांचके नाम २–क्षार १ काच २॥

–ऽथ चपलो रसः सूतश्च पारदे ॥ ९९ ॥

पारेके नाम ४–चपल १ रस २ सूत ३ पारद ४ ॥ ९९ ॥

गवलं माहिषं शृंग–

भैंसेके सींगका नाम १–गवल१ ॥

–मभ्रकं गिरिजामले ।

अबरखके नाम ३–अभ्रक १ गिरिज २ अमल ३ ॥

स्रोतोऽञ्जनं तु सौवीरं कापोता- ञ्जनयामुने ॥ १०० ॥

सुर्माके नाम ४–स्रोतोंऽजन१ सौवीर २कापोतांजन ३ यामुन ४ ॥ १०० ॥

तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके ।

तूतिया (नीलाथोथा) के नाम ४—तुत्थाञ्जन १ शिखिग्रीव २ वितुन्नक ३ मयूरक ४ ॥

कर्परी दार्विका क्वाथोद्भवं तुत्थं-

तूतियाके भेद ३—कर्परी १ दार्विका २ तुत्थ ३ ॥

—रसाञ्जनम् ॥ १०१ ॥ रसगर्भं तार्क्ष्यशैलं—

रसोतके नाम ३—रसाञ्जन १ ॥ १०१ ॥ रसगर्भ २ तार्क्ष्यशैल ३ ॥

—गन्धाश्मनि तु गन्धिकः । सौगन्धिकश्च—

गन्धकके नाम ३—गन्धाश्मन् १ गन्धिक २ सौगन्धिक ३ ॥

—चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥ १०२ ॥

काले सुर्मेके नाम ३—चक्षुष्या १ कुलाली २ कुलत्थिका ३ ॥ १०२ ॥

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।

पीतलको तपाके घिसनेसे जो अंजन बने उसके नाम ४—रीतिपुष्प १ पुष्पकेतु २ पौष्पक ३ कुसुमांजन ४ ॥

पिञ्जरं पीतनं तालमालं च हरितालके ॥ १०३ ॥

हरितालके नाम ५—पिञ्जर १ पीतन २ ताल ३ आल ४ हरितालक ५ ॥ १०३ ॥

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ।

शिलाजीतके नाम५—गैरेय १ अर्थ्य २ गिरिज ३ अश्मज ४ शिलाजतु५ ॥

बोलगन्धरसप्राणपिंडगोपरसाः समाः ॥ १०४ ॥

गन्धरसके नाम ५—बोल१गन्धरस २प्राण३पिण्ड ४ गोपरस५ ॥ १०४॥

डिण्डीरोऽब्धिकफः फेनः—

समुद्रके झागके नाम ३—डिंडीर १ अब्धिकफ २ फेन ३ ॥

सिन्दूरं नागसंभवम् ।

सिंदूरके नाम २—सिंदूर १ नागसम्भव २ ॥

नागसीसकयोगेष्टवप्राणि—

सीसेके नाम ४—नाग १ सीसक२ योगेष्ट ३ वप्र ४ ॥

—त्रपु पिच्चटम् ॥ १०५ ॥ रङ्गवङ्गे—

रांगके नाम ४—त्रपु १ पिच्चट २ ॥ १०५ ॥ रंग ३ वंग ४ ॥

—अथ पिचुस्तूलो—

रुईके नाम २–पिचु १ तूल २ ॥

–ऽथ कमलोत्तरम् । स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥ १०६ ॥

कुसुम्भके नाम ४–कमलोत्तर १ कुसुम्भ २ वह्निशिख ३ महारजन ४ ॥ १०६ ॥

मेषकम्बल ऊर्णायुः–

ऊनी कम्बलके नाम २–मेषकम्बल १ ऊर्णायु २ ॥

–शशोर्णं शशलोमनि ।

खरगोशकी ऊनके नाम २–शशोर्ण १ शशलोमन् २ ॥

मधु क्षौद्रं माक्षिकादि–

शहदके नाम ३–मधु १ क्षौद्र २ माक्षिक ३ ॥

–मधूच्छिष्टं तु सिक्थकम् १०७॥

मोमके नाम २–मधूच्छिष्ट १ सिक्थक २ ॥ १०७ ॥

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका । नैपाली कुनटी गोला–

मैनशिलके नाम ७–मनःशिला १ मनोगुप्ता २ मनोह्वा ३ नागजिह्विका ४ नैपाली ५ कुनटी ६ गोला ७ ॥

–यवक्षारो यवाग्रजः ॥ १०८ ॥ पाक्यो–

जवाखारके नाम ३–यवक्षार १ यवाग्रज २– ॥ १०८ ॥ पाक्य ३ ॥

–ऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः । सौवर्चलं स्याद्रुचकं–

सज्जीके नाम ५–सर्जिकाक्षार १ कापोत २ सुखवर्चक ३ सौवर्चल ४ रुचक २ ॥

–त्वक्क्षीरी वंशरोचना ॥ १०९॥

वंशलोचनके नाम २–त्वक्क्षीरी १ वंशरोचना २ ॥ १०९ ॥

शिग्रुजं श्वेतमरिचं–

सफेद मिर्चके नाम २–शिग्रुज १ श्वेतमरिच २ ॥

–मोरटं मूलमैक्षवम् ।

ईखकी जड़का नाम १–मोरट १ ॥

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥ ११० ॥

पीपलामूलके नाम ३–ग्रंथिक १ पिप्पलीमूल २–चटकाशिरस् ३॥ ११० ॥

गोलोमी भूतकेशो ना–

जटामांसीके नाम २–गोलोमी १ भूतकेश २ ॥

–पत्राङ्गं रक्तचन्दनम् ।

पतंगके नाम २–पत्रांग १ रक्तचन्दन २ ॥

त्रिकटु त्र्यूषणं व्योषं–

सोंठि, पीपल, मिर्च इन तीनोंके समूहके नाम ३—त्रिकटु १ त्र्यूषण २ व्योष ३॥

—त्रिफला तु फलत्रिकम्॥१११॥

आंवला, हरड़, बहेडा इन तीनोंके समूहके नाम २—त्रिफला १ फलत्रिक २ ॥ १११ ॥

इति वैश्यवर्गः ॥ ९ ॥

अथ शूद्रवर्गः १०.

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

शूद्रके नाम ४—शूद्र १ अवरवर्ण २ वृषल ३ जघन्यज ॥ ४ ॥

आचण्डालात्तु सङ्कीर्णा अम्बष्ठकरणादयः ॥ १ ॥

ब्राह्मणीमें शूद्रसे उत्पन्न हो उसका नाम—चण्डाल ॥ चण्डालसे लेकर अम्बष्ठ करण आदिकोंका नाम १—संकीर्ण १ ॥ १ ॥

शूद्राविशोस्तु करणो—

शूद्रामें वैश्यसे उत्पन्न हुएका नाम १—करण १ ॥

—ऽम्बष्ठो वैश्याद्विजन्मनोः ।

बनैनीमें ब्राह्मणसे उत्पन्न हो उसका नाम १—अम्बष्ठ १ ॥

शूद्राक्षत्त्रिययोरुग्रो—

शूद्रामें क्षत्रियसे उत्पन्न हुएका नाम १ उग्र १ ॥

—मागधः क्षत्रियाविशोः ॥ २ ॥

क्षत्रियाणीमें वैश्यसे उत्पन्न हुएका नाम १—मागध १ ॥ २ ॥

माहिष्योऽर्याक्षत्त्रिययोः—

बनैनीमें क्षत्रियसे उत्पन्न हुएका नाम १—माहिष्य १ ॥

—क्षत्ताऽर्याशूद्रयोः सुतः ।

बनैनीमें शूद्रसे उत्पन्न हुएका नाम १—क्षत्तृ १ ॥

ब्राह्मण्यां क्षत्रियात्सूत—

ब्राह्मणीमें क्षत्रियसे उत्पन्न हुएका नाम १—सूत १ ॥

—स्तस्यां वैदेहको विशः ॥ ३ ॥

ब्राह्मणीमें वैश्यसे उत्पन्न हुएका नाम १—वैदेहक १ ॥ ३ ॥

रथकारस्तु माहिष्यात्करण्यां यस्य संभवः ।

करणीमें माहिष्यसे उत्पन्न हुएका नाम १—रथकार १ ।

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

ब्राह्मणीमें शूद्रसे उत्पन्न हुएका नाम १—चण्डाल १ ॥ ४ ॥

कारुः शिल्पी—

कारीगरोंके नाम २—कारु १ शिल्पिन् २ ॥

-संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः।

कारीगरोंके समूहका नाम १-श्रेणि १॥

कुलकः स्यात्कुलश्रेष्ठी-

कारीगरोंके अफसर अर्थात् मिस्तरीके नाम २-कुलक १ कुलश्रेष्ठी २॥

-मालाकारस्तु मालिकः ॥ ५॥

मालीके नाम २-मालाकार १ मालिक २ ॥ ५ ॥

कुम्भकारः कुलालः स्यात्-

कुम्हारके नाम २-कुम्भकार १ कुलाल २ ॥ ५ ॥

-पलगण्डस्तु लेपकः।

कमंगरके नाम २-पलगण्ड १ लेपक २ ॥

तन्तुवायः कुविन्दः स्यात्-

जुलाहेके नाम २-तन्तुवाय १ कुविन्द २ ॥

-तुन्नवायस्तु सौचिकः ॥ ६ ॥

दरजीके नाम २-तुन्नवाय १ सौचिक २ ॥ ६ ॥

रंगाजीवश्चित्रकरः-

चित्रकारके नाम २-रङ्गाजीव १ चित्रकर २ ॥

-शस्त्रमार्जोऽसिधावकः ॥

शिकिलीगरके नाम २-शस्त्रमार्ज १ असिधावक २ ॥

पादूकृच्चर्मकारः स्या-

चमारके नाम २-पादूकृत् १ चर्मकार २ ॥

-द्व्योकारो लोहकारकः ॥ ७ ॥

लोहारके नाम २-व्योकार १ लोहकारक २ ॥ ७ ॥

नाडिन्धमः स्वर्णकारः कलादो रुक्मकारकः।

सुनारके नाम ४-नाडिन्धम १ स्वर्णकार ३ कलाद ३ रुक्मकारक ४ ॥

स्याच्छाङ्खिकः काम्बविकः-

मनिहारके नाम २-शाङ्खिक १ काम्बविक २ ॥

-शौल्विकस्ताम्रकुट्टकः ॥ ८ ॥

ठठेरेके नाम २-शौल्विक १ ताम्रकुट्टक २ ॥ ८ ॥

-तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट्।

बढ़ईके नाम-५ तक्षन् १ वर्धकी २ त्वष्टृ ३ रथकार ४ काष्ठतक्ष् ५ ॥

ग्रामाधीनो ग्रामतक्षः-

गांवके बढ़ईके नाम २-ग्रामाधीन १ ग्रामतक्ष २ ॥

-कौटतक्षोऽनधीनकः ॥ ९ ॥

स्वतन्त्र बढ़ईका नाम १-कौटतक्ष १ ॥ ९ ॥

क्षुरी मुण्डी दिवाकीर्तिनापितान्तावसायिनः।

नाईके नाम ५–क्षुरिन् १मुंडिन् २ दिवाकीर्ति ३नापित४अन्तावसायिन् ५।

निर्णेजकः स्याद्रजकः–

धोबीके नाम २–निर्णेजक १ रजक २ ॥

–शौण्डिको मण्डहारकः ॥१०॥

कलालके नाम २–शौण्डिक १ मण्डहारक २ ॥ १० ॥

जाबालः स्यादजाजीवो–

गढ़रियेके नाम २–जाबाल १ अजाजीव २ ॥

–देवाजीवस्तु देवलः ।

पण्डाके नाम २–देवाजीव १ देवल २ ॥

स्यान्माया शाम्बरी–

इन्द्रजालके नाम २–माया १ शांबरी २ ॥

–मायाकारस्तु प्रतिहारकः ॥११॥

इन्द्रजाली अर्थात् बाजीगरके नाम२–मायाकार १ प्रतिहारक २ ॥ ११ ॥

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः । भरता इत्यपि नटा–

नटके नाम ६–शैलालिन् १ शैलूष २ जायाजीव ३ कृशाश्विन् ४ भरत ५ नट ६ ॥

–श्चारणास्तु कुशीलवाः ॥१२॥

कत्थकके नाम २–चारण १ कुशीलव २ ॥ १२ ॥

मार्दंगिका मौरजिकाः–

मृदंगके बजानेवालेके नाम २–मार्दंगिक १ मौरजिक २ ॥

–पाणिवादास्तु पाणिघाः ।

ताली बजानेवालेके नाम २–पाणिवाद १ पाणिघ २ ॥

वेणुध्माः स्युर्वैणविका–

बांसुरी बजानेवालेके नाम २–वेणुध्म १ वैणविक २ ॥

–वीणावादास्तु वैणिकाः ॥१३॥

वीणा बजानेवालेके नाम २–वीणावाद १ वैणिक २ ॥ १३ ॥

जीवान्तकः शाकुनिको–

चिड़ीमारके नाम २–जीवान्तक १ शाकुनिक २ ॥

–द्वौ वागुरिकजालिकौ ।

व्याधके नाम २–वागुरिक १ जालिक २ ॥

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

कसाईके नाम ३–वैतंसिक १ कौटिक २ मांसिक ३ ॥ १४ ॥

भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः ।

मजूरके नाम ४—भृतक १ भृतिभुज् २ कर्मकर ३ वैतनिक ४ ॥

वार्तावहो वैवधिको—

दूतके नाम २—वार्तावह १ वैवधिक २ ॥

—भारवाहस्तु भारिकः ॥ १५ ॥

बोझा ढोनेवालेके नाम २—भारवाह १ भारिक २ ॥ १५ ॥

विवर्णः पामरो नीचः प्राकृतस्तु पृथग्जनः । निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥

नीचके नाम १०—विवर्ण १ पामर २ नीच ३ प्राकृत ४ पृथग्जन ५ निहीन ६ अपसद ७ जाल्म ८ क्षुल्लक ९ इतर १० ॥ १६ ॥

भृत्ये दासेरदासेयदासगोप्यकचेटकाः । नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥

दास वा टहलुएके नाम ११—भृत्य १ दासेर २ दासेय ३ दास ४ गोप्यक ५ चेटक ६ नियोज्य ७ किंकर ८ प्रैष्य ९ भुजिष्य १० परिचारक ११ ॥ १७ ॥

पराचितपरिस्कंदपरजातपरैधिताः ।

जो दूसरेसे पाला जाय उसके अर्थात् रहुआके नाम ४—पराचित १ परिस्कन्द २ परजात ३ परैधित ४ ॥

मंदस्तुंदपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ॥ १८ ॥

आलसीके नाम ६—मन्द १ तुन्दपरिमृज २ आलस्य ३ शीतक ४ अलस ५ अनुष्ण ६ ॥ १८ ॥

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ।

चतुरके नाम ६—दक्ष १ चतुर २ पेशल ३ पटु ४ सूत्थान ५ उष्ण ६ ॥

चण्डालप्लवमातंगदिवाकीर्तिजनंगमाः ॥ १९ ॥ निषादश्वपचावंतेवासिचाण्डालपुक्कसाः ।

चाण्डालके नाम १०—चण्डाल १ प्लव २ मातङ्ग ३ दिवाकीर्ति ४ जनंगम ५ ॥ १९ ॥ निषाद ६ श्वपच ७ अन्तेवासिन् ८ चाण्डाल ९ पुक्कस १० ॥

भेदाः किरातशबरपुलिंदा म्लेच्छजातयः ॥ २० ॥

म्लेच्छजातिके भेद जंगली गोमांस खानेवाले हेबूढे आदिके नाम ३—किरात १ शबर २ पुलिन्द ॥ २० ॥

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ।

मृग पकड़नेवालेके नाम ४—व्याध १ मृगवधाजीव २ मृगयु ३ लुब्धक ४ ॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥ २१ ॥ शुनको भषकः श्वा स्या-

कुत्तेके नाम ७—कौलेयक १ सारमेय२ कुक्कुर ३मृगदंशक ४॥२१॥ शुनक ५ भषक ६ श्वन् ७ ॥

—दलर्कस्तु स योगितः ।

प्रयोगसे उन्मत्त हुए कुत्तेका नाम १—अलर्क १ ॥

श्वा विश्वकद्रुर्मृगयाकुशलः-

शिकारी कुत्तेका नाम १—विश्वकद्रु १ ॥

—सरमा शुनी ॥ २२ ॥

कुतियाके नाम २—सरमा १ शुनी २ ॥ २२ ॥

विट्चरः सूकरो ग्राम्यो-

गांवके सूकरका नाम १—विट्चर १॥

—वर्करस्तरुणः पशुः ।

तरुणपशुका नाम १—वर्कर १ ॥

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ॥ २३ ॥

शिकारके नाम ४—आच्छोदन १ मृगव्य २ आखेट ३ मृगया४॥ २३ ॥

दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ।

व्याधने जिस मृगके दहिने अंगमें मारा हो उसका नाम१-दक्षिणेर्मन् १॥

चौरैकागारिकस्तेनदस्युतस्कर-मोषकाः ॥ २४ ॥ प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ।

चोरके नाम १०—चौर १ ऐकागारिक २ स्तेन ३ दस्यु ४ तस्कर ५ मोषक ६ ॥ २४॥ प्रतिरोधिन् ७ परास्कन्दिन् ८ पाटच्चर९ मलिम्लुच १०॥

चौरिका स्तैन्यचौर्ये च स्तेयं-

चोरीके नाम ४—चौरिका १ स्तैन्य २ चौर्य ३ स्तेय ४ ॥

—लोप्त्रं तु तद्धने ॥ २५ ॥

चोरीके मालका नाम १—लोप्त्र १ ॥ २५ ॥

वीतंसस्तूपकरणं बन्धने मृग-पक्षिणाम् ।

पक्षी वा मृगोंके पकड़नेकी सामग्री अर्थात् जालादिका नाम १—वीतंस१ ॥

उन्माथः कूटयन्त्रं स्या-

काबकपींजरे आदिके नाम २—उन्माथ १ कूटयन्त्र २ ॥

—द्वागुरा मृगबन्धनी ॥ २६ ॥

जालके नाम २—वागुरा १ मृगबन्धनी २ ॥ २६ ॥

शुल्बं वराटकं स्त्री तु रज्जुस्त्रिषु वटी गुणः ।

रस्सीके नाम ५–शुल्व १ वराटक २ रज्जु ३ वटी ४ गुण ५ ॥

उद्घाघटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥ २७ ॥

अरहटके नाम २–उद्घाटन १ घटीयन्त्र २ ॥ २७ ॥

पुंसि वेमा वायदण्डः–

जुलाहेके कपड़ा बुननेके औजारके नाम २–वेमन् १ वायदण्ड २ ॥

सूत्राणि नरि तन्तवः ।

सूतके नाम २–सूत्र १ तन्तु २ ॥

वाणिर्व्यूतिः स्त्रियौ तुल्ये–

कपड़े आदिके बुननेके नाम २–वाणि १ व्यूति २ ॥

–पुस्तं लेप्यादिकर्मणि ॥२८॥

मिट्टी आदिसे लीपने पोतनेका नाम १–पुस्त १ ॥ २८ ॥

पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ।

गुड़िया अर्थात् वस्त्रकी बनाई हुई पुतलीके नाम २–पांचालिका १ पुत्रिका १ ॥

जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु ।

लाखके विकारका नाम १–जातुष १॥ वंगके विकारका नाम १–त्रापुष १ ॥

पिटकः पेटकः पेटा मंजूषा–

पिटारेके नाम ४–पिटक १ पेटक २ पेटा ३ मंजूषा ४ ॥

–ऽथ विहङ्गिका ॥ २९ ॥ भारयष्टि–

बहँगी (खूँटी) के नाम २–विहंगिका १ ॥ २९ ॥ भारयष्टि २ ॥

–स्तदालंबि शिक्यं काचो–

बहँगीके छीकेके नाम २–शिक्य १ काच २ ॥

–ऽथ पादुका । पादूरुपानत्स्त्री–

जूतेके नाम ३–पादुका १ पादू २ उपानत् ३ ॥

–सैवानुपदीना पदायता ॥३०॥

मोजेका नाम १–अनुपदीना १ ॥ ३० ॥

नध्री वध्री वरत्रा स्या–

चमड़ेकी रस्सीके नाम ३–नध्री १ वध्री २ वरत्रा ३ ॥

–दश्वादेस्ताडनी कशा ।

कोड़ेका नाम १–कशा १ ॥

चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ॥ ३१ ॥

किंगरीबाजोंके नाम ३–चाण्डालिका १ कण्डोलवीणा २ चण्डालवल्लकी ३ ॥ ३१ ॥

नाराची स्यादेषणिका–

कांटा अर्थात् सोना आदि तोलनेकी तराजूके नाम २–नाराची १ एषणिका २ ॥

–शाणस्तु निकषः कषः ।

कसोटीके नाम ३–शाण १ निकष २ कष ३ ॥

व्रश्चनः पत्रपरशु–

रेतीके नाम २–व्रश्चन १ पत्रपरशु २ ॥

–ईषिका तूलिका समे ॥ ३२ ॥

सलाईके नाम २–ईषिका १ तूलिका २ ॥ ३२ ॥

तैजसा वर्तनी मूषा–

सुवर्ण इत्यादि धातु गलानेकी धरियाके नाम ३–तैजसा १ वर्तनी २ मूषा ३ ॥

–भस्त्रा चर्मप्रसेविका ।

फूँकनीके नाम २–भस्त्रा १ चर्मप्रसेविका २ ॥

आस्फोटनी वेधनिका–

बर्मेके नाम २–आस्फोटनी १ वेधनिका २ ॥

–कृपाणी कर्तरी समे ॥ ३३ ॥

एक प्रकारकी कैंचीके नाम २–कृपाणी १ कर्तरी २ ॥ ३३ ॥

वृक्षादनी वृक्षभेदी–

बसूले आदिके नाम २–वृक्षादनी १ वृक्षभेदी २ ॥

–टंकः पाषाणदारणः ।

टांकी अर्थात् पत्थर फोड़नेके हथियारके नाम २–टंक १ पाषाणदारण २ ॥

क्रकचोऽस्त्री करपत्र–

आरेके नाम २–क्रकच १ करपत्र २ ॥

–मारा चर्मप्रभेदिका ॥ ३४ ॥

आरीके नाम २–आरा १ चर्मप्रभेदिका २ ॥

सूर्मी स्थूणाऽयःप्रतिमा–

लोहेकी मूर्त्तिके नाम ३–सूर्मी १ स्थूणा २ अयःप्रतिमा ३ ॥

–शिल्पं कर्म कलादिकम् ॥ ३४ ॥

कारीगरीका नाम १–शिल्प १ ॥ ३४ ॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधि–

प्रतिमा अर्थात् तसबीरके नाम ८–प्रतिमान १ प्रतिबिम्ब २ प्रतिमा ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृति ६ अर्चा ७ प्रतिनिधि ८ ॥

–रुपमोपमानं स्यात् ॥ ३५ ॥

मिसाल और जिसकी मिसाल दी जाय उसके नाम २–उपमा १ उपमान २ ॥ ३५ ॥

वाच्यलिंगाः समस्तुल्यः सदृक्षः सदृशः सदृक् ॥ ३६ ॥ साधारणः समानश्च–

बराबरके नाम ७–सम १ तुल्य २

सदृक्ष ३ सदृश ४ सदृग् ५ ॥ ३६ ॥ साधारण ६ समान ७ ॥

–स्युरुत्तरपदे त्वमी । निभ-संकाशनीकाशप्रतीकाशोपमादयः ॥ ३७ ॥

समानके नाम५–निभ१संकाश २ नीकाश३प्रतीकाश ४ उपमा ५॥ ३७॥

कर्मण्या तु विधा भृत्या भृतयो भर्म वेतनम् । भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ॥ ३८ ॥

मजूरीके नाम ११–कर्मण्या १ विधा २ भृत्या ३भृति ४ भर्मन्५वेतन ६ भरण्य ७ भरण ८ मूल्य ९ निर्वेश १० पण ११ ॥ ३८ ॥

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा । गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता ॥ ३९ ॥ मदिरा कश्यमद्ये चा–

मदिरा अर्थात् शराबके नाम १३–सुरा १ हलिप्रिया २ हाला ३परिस्रुत्४ वरुणात्मजा ५ गन्धोत्तमा ६ प्रसन्ना ७ इरा ८ कादम्बरी९परिस्रुता १०॥ ३९॥ मदिरा ११ कश्य १२ मद्य १३ ॥

–प्यवदंशस्तु भक्षणम् ।

मद्यपानकी रुचि उत्पन्न करनेके लिये भूंजा चना इत्यादि खानेका नाम १–अवदंश १ ॥

शुण्डापानं मदस्थानं–

मदिरा पीनेके स्थानके नाम २–शुण्डापान १ मदस्थान २ ॥

–मधुवारा मधुक्रमाः ॥ ४० ॥

मदिरा पीनेके समयके नाम२–मधुवार १ मधुक्रम २ ॥ ४० ॥

मध्वासवो माधवको मधु माध्वीकमद्वयोः ।

महुवासे उत्पन्न मदिराके नाम ४–मध्वासव १ माधवक२मधु३माध्वीक ४

मैरेयमासवः सीधु–

गुड़सिराकी मदिराके नाम ३–मैरेय १ आसव २ सीधु ३ ॥

–र्मेदको जगलः समौ ॥ ४१ ॥

मदिराके फोकसके नाम २–मेदक१ जगल २ ॥ ४१ ॥

संधानं स्यादभिषवः–

मदिरा करनेके नाम २–संधान १ अभिषव २ ॥

–किण्वं पुंसि तु नग्नहूः ।

तंदुलादि द्रव्यसे बने हुए मद्यके नाम २–किण्व १ नग्नहू २ ॥

कारोत्तरः सुरामण्ड–

मदिराके मण्डके नाम २–कारोत्तर १ सुरामण्ड २ ॥

आपानं पानगोष्ठिका ॥ ४२ ॥

दारू पीनेकी सभाके नाम२–आपान १ पानगोष्ठिका २ ॥ ४२ ॥

चषकोऽस्त्री पानपात्रं-

दारू पीनेके बर्त्तन (प्याले) के नाम २–चषक १ पानपात्र २ ॥

–सरकोऽप्यनुतर्षणम् ।

मदिरा पीनेके नाम २–सरक १ अनुतर्षण २ ॥

धूर्त्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ॥ ४३ ॥

जुआरीके नाम५–धूर्त १ अक्षदेविन् २ कितव ३ अक्षधूर्त्त ४ द्यूतकृत्५॥४३॥

स्युर्लग्नकाः प्रतिभुवः-

जामिनके नाम२–लग्नक१प्रतिभू२॥

–सभिका द्यूतकारकाः ।

जुवा खिलानेवालेके नाम२–सभिक १ द्यूतकारक २ ॥

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ४४ ॥

जूएके नाम ४–द्यूत १ अक्षवती २ कैतव ३ पण ४ ॥ ४४ ॥

पणोऽक्षेषु ग्लहो-

बाजी लगानेके नाम२-पण१ग्लह२॥

–ऽक्षास्तु देवनाः पाशकाश्च ते ।

पासेके नाम ३–अक्ष १ देवन २ पाशक ३ ॥

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ॥ ४५ ॥

सारक इधर उधर फेरनेवालेका नाम १–परिणाय १ ॥ ४५ ॥

अष्टापदं शारिफलं-

बिसायती (चौपड़) के नाम २–अष्टापद १ शारिफल २ ॥

–प्राणिद्यूतं समाह्वयः ।

मुरगा आदि जीवोंकी लड़ाईरूप द्यूतके नाम २–प्राणिद्यूत १ समाह्वय२॥

उक्ता भूरिप्रयोगत्वादेकस्मिन्नेव यौगिकाः ॥ ४६ ॥ ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ।

इस वर्गमें जो यौगिक मालाकार मार्दंगिक वैणविक आदि शब्द काव्यादिकोंके अधिक प्रयोगके अनुसार केवल पुँल्लिंगमें ही कहे हैं वे शब्द व्याकरणके नियमानुसार स्त्रीलिंग नपुंसकलिंगमें भी होते हैं, जैसे मालाकारकी स्त्री मालाकारी और मालाकारका कुल मालाकार इसी प्रकार सर्वत्र जानना ॥ ४६ ॥

इत्यमरसिंहकृतौ नामलिंगानुशासने । भूम्यादिकाण्डो द्वितीयः सांग एव समर्थितः ॥ ४७ ॥

इति श्रीमदमरसिंहविरचितामरकोशे ज्वालाप्रसादकृतभाषाटीकायां द्वितीयः काण्डः समाप्तः ॥ २ ॥

इति द्वितीयः काण्डः ॥ २ ॥

श्रीः।

अथ तृतीयः काण्डः।

अथ विशेष्यनिघ्नवर्गः १.

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ॥ लिंगादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥१॥

इस सामान्य तृतीयकाण्डमें स्वर्गादि वर्गोंके आश्रित शब्द विशेष्यनिघ्नवर्ग, संकीर्णवर्ग, नानार्थवर्ग, अव्ययवर्ग, और लिंगादिसंग्रहवर्गके द्वारा कहेंगे॥१॥

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः। गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥

स्त्री दार आदि विशेष्यभूत पदोंमें जो लिङ्ग और संख्या हो वही लिङ्ग और संख्या गुण और द्रव्य तथा क्रिया वाचकशब्दोंमें होनेसे दार स्त्री आदि शब्दोंके गुण द्रव्य क्रियावाचक शब्द विशेषण हो सकते हैं. जैसे—सुकृतिनी स्त्री, सुकृतिनो दाराः, सुकृति कलत्रम्। दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कलत्रम्। पाचिका स्त्री, पाचका दाराः, पाचकं कलत्रम् ॥ २ ॥

सुकृती पुण्यवान् धन्यो—

भाग्यवान् पुरुषके नाम ३—सुकृतिन् १ पुण्यवत् २ धन्य ३ ॥

—महेच्छस्तु महाशयः।

उदारचित्त पुरुषके नाम २—महेच्छ १ महाशय २ ॥

हृदयालुः सुहृदयो—

शुद्धचित्त पुरुषके नाम २—हृदयालु १ सुहृदय २ ॥

—महोत्साहो महोद्यमः ॥ ३ ॥

बहुत उद्यम करनेवाले पुरुषके नाम २—महोत्साह १ महोद्यम २ ॥ ३ ॥

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः। वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥

चतुर पुरुषके नाम १०—प्रवीण १ निपुण २ अभिज्ञ ३ विज्ञ ४ निष्णात ५ शिक्षित ६ वैज्ञानिक ७ कृतमुख ८ कृतिन् ९ कुशल १० ॥ ४ ॥

पूज्यः प्रतीक्ष्यः—

मान्य पुरुषके नाम २—पूज्य १ प्रतीक्ष्य ॥ २ ॥

–सांशयिकः संशयापन्नमानसः।

संशय करानेवाली वस्तुके नाम २–सांशयिक १ संशयापन्नमानस २ ॥

दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ५ ॥

दक्षिणाके योग्य पुरुषके नाम ३–दक्षिणीय १दक्षिणार्ह २ दक्षिण्य३॥५॥

स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।

अतिदानी पुरुषके नाम ४–वदान्य १स्थूललक्ष्य २दानशौण्ड ३वहुप्रद ४॥

जैवातृकः स्यादायुष्मा–

दीर्घायु पुरुषके नाम २–जैवातुक१ आयुष्मत् १ ॥

–नन्तर्वाणिस्तु शास्त्रवित् ॥६॥

शास्त्रीके नाम २–अन्तर्वाणि १ शास्त्रविद् २ ॥ ६ ॥

परीक्षकः कारणिको–

परीक्षकके नाम २–परीक्षक १ कारणिक २ ॥

–वरदस्तु समर्धकः ।

वरदान देनेवालेके नाम २–वरद१ समर्धक २ ॥

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

प्रसन्नके नाम ४–हर्षमाण१विकुर्वाण२ प्रमनस् ३ हृष्टमानस ४ ॥ ७॥

दुर्मना विमना अन्तर्मनाः–

उदास पुरुषके नाम ३–दुर्मनस् १ विमनस् २ अन्तर्मनस् ३ ॥

–स्यादुत्क उन्मनाः ।

उत्कण्ठायुक्त पुरुषके नाम २–उत्क १ उन्मनस् २ ॥

दक्षिणे सरलोदारौ–

सीधे पुरुषके नाम ३–दक्षिण १ सरल २ उदार ३ ॥

–सुकलो दातृभोक्तरि ॥ ८ ॥

दानी और भोगी पुरुषका नाम १–सुकल १ ॥ ८ ॥

तत्परे प्रसितासक्ता–

कार्य्यविशेषमें चित्त लगानेवाले पुरुषके नाम ३–तत्पर १प्रसित २आसक्त ३ ॥

–विष्टार्थोद्युक्त उत्सुकः ।

अभीष्ट वस्तुके प्राप्त करनेमें तत्पर पुरुषके नाम २–इष्टार्थोद्युक्त१उत्सुक२॥

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥

प्रसिद्ध पुरुषके नाम ६–प्रतीत १ प्रथित २ ख्यात ३ वित्त ४ विज्ञात५ विश्रुत ६ ॥ ९ ॥

गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ ।

गुणोंसे प्रसिद्ध पुरुषके नाम २–कृतलक्षण १ आहितलक्षण २ ॥

इभ्य आढ्यो धनी-

धनी पुरुषके नाम ३-इभ्य १ आढ्य २ धनिन् ३ ॥

-स्वामी त्वीश्वरः पतिरीशिता ॥१०॥ अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।

स्वामीके नाम १०-स्वामिन् १ ईश्वर २ पति३ ईशितृ४॥१०॥अधिभू ५ नायक ६ नेतृ ७ प्रभु ८ परिवृढ ९ अधिप १० ॥

अधिकर्द्धिः समृद्धः स्यात्-

सम्पत्तिमान् पुरुषके नाम २-अधिकर्धि १ समृद्ध २।

-कुटुम्बव्यापृतस्तु यः ॥११॥ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

कुटुम्बके पालन करनेमें तत्पर पुरुषके नाम ३-कुटुम्बव्यापृत १ ॥११॥ अभ्यागारिक २ उपाधि ३ ॥

वारांगरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

अंग और रूपसे अतिश्रेष्ठ पुरुषका नाम १-सिंहसंहनन १ ॥ १२ ॥

निर्वार्यः कार्यकर्ता यः सम्पन्नः सत्त्वसम्पदा ।

जो दुःखमें भी प्रसन्नताके साथ कार्य किया करता है उस पुरुषका नाम १-निर्वार्य १ ॥

अवाचि मूको-

गूँगे पुरुषके नाम २-अवाच् १ मूक २॥

-ऽथ मनोजवसः पितृसन्निभः ॥ १३ ॥

जो पुरुष पिताके समान माना जाय उस पुरुषके नाम २-मनोजवस् १ पितृसन्निभ २ ॥ १३ ॥

सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।

जो वरको आदरपूर्वक वस्त्र भूषण सहित कन्यादान दे उस पुरुषका नाम १-कूकुद १॥

लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्-

शोभावान्के नाम ४-लक्ष्मीवत् १ लक्ष्मण २ श्रील ३ श्रीमत् ४ ॥

-स्निग्धस्तु वत्सलः ॥ १४ ॥

स्नेही पुरुषके नाम २-स्निग्ध १ वत्सल २ ॥ १४ ॥

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।

दयावान् पुरुषके नाम ४-दयालु १ कारुणिक २ कृपालु ३ सूरत ॥ ४ ॥

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥

स्वतन्त्र पुरुषके नाम ५–स्वतन्त्र १ अपावृत २ स्वैरिन् ३ स्वच्छन्द ४ निरवग्रह ५ ॥ १५ ॥

परतन्त्रः पराधीनः परवान्नाथवानपि ।

पराधीन पुरुषके नाम ४–परतन्त्र १ पराधीन २ परवत् ३ नाथवत् ४ ॥

अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥ १६ ॥

अधीनके नाम५–अधीन १ निघ्न२ आयत्त३अस्वच्छन्द४गृह्यक५ ॥ १६ ॥

खलपूः स्याद्बहुकरो–

बुहारने झारनेवाले मनुष्यके नाम २–खलपू १ बहुकर २ ॥

–दीर्घसूत्रश्चिरक्रियः ।

दीर्घसूत्र (थोड़ी देरके कामको बहुत देरमें करनेवालों) के नाम २–दीर्घसूत्र १ चिरक्रिय २ ॥

जाल्मोऽसमीक्ष्यकारी स्यात्–

विना विचारे कार्य करनेवाले पुरुषके नाम२–जाल्म १ असमीक्ष्यकारिन् २ ॥

–कुण्ठो मन्दः क्रियासु यः॥ १७॥

आलसी वा मूढ पुरुषका नाम १–कुण्ठ १ ॥ १७ ॥

कर्मक्षमोऽलंकर्मीणः–

कार्य्य करनेमें समर्थ पुरुषके नाम २–कर्मक्षम १ अलंकर्मीण २ ॥

–क्रियावान्कर्मसूद्यतः ।

कार्य करनेमें तत्पर पुरुषका नाम १–क्रियावत् १ ॥

स कार्मः कर्मशीलो यः–

जो नित्य काममें लगा रहे उस पुरुषके नाम २–कार्म १ कर्मशील २ ॥

–कर्मशूरस्तु कर्मठः ॥ १८ ॥

प्रयत्नपूर्वक जो कार्यको समाप्त करे उस पुरुषके नाम २–कर्मशूर १ कर्मठ २ ॥ १८ ॥

–भरण्यभुक्कर्मकरः–

मजदूरके नाम २–भरण्यभुज् १ कर्मकर २ ॥

–कर्मकारस्तु तत्क्रियः ।

विना मजूरीके भी जो कार्य कर दे उस पुरुषका नाम १–कर्मकार १ ॥

अपस्नातो मृतस्नात–

किसीके मरनेके अनन्तर स्नान किये हुए पुरुषके नाम २–अपस्नात १ मृतस्नात २ ॥

आमिषाशी तु शौष्कुलः॥१९॥

मांस खानेवाले पुरुषके नाम २–आमिषाशिन् १ शौष्कुल २ ॥ १९ ॥

बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ।

भूखे पुरुषके नाम ४–बुभुक्षित १ क्षुधित २ जिघत्सु ३ अशनायित ४ ॥

परान्नः परपिण्डादो–

जो पराये ही अन्नसे जीता हो उस पुरुषके नाम २–परान्न १ परपिण्डाद २ ॥

–भक्षको घस्मरोऽद्मरः ॥ २० ॥

खानेवालेके नाम ३–भक्षक १ घस्मर २ अद्मर ३ ॥ २० ॥

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ॥

अत्यन्त ही भूखे पुरुषके नाम २–आद्यून १ औदरिक २ ॥

उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ २१ ॥

पेटको ही भरनेवाले पुरुषके नाम २–आत्मम्भरि १ कुक्षिम्भरि २ ॥२१॥

सर्वान्नीनस्तु सर्वान्नभोजी–

जो सब वर्णोंका अन्न भोजन कर लेता हो उस पुरुषके नाम २–सर्वान्नीन १ सर्वान्नभोजिन् २ ॥

–गृध्नस्तु गर्धनः । लुब्धोऽभिलाषुकस्तृष्णक्–

लोभी पुरुषके नाम ५–गृध्न १ गर्धन २ लुब्ध ३ अभिलाषुक ४ तृष्णज् ५ ॥

–समौ लोलुपलोलुभौ ॥ २२ ॥

अतिलोभीके नाम २–लोलुप १ लोलुभ २ ॥ २२ ॥

सोन्मादस्तून्मदिष्णुः स्या–

उन्मत्तपुरुषके नाम २–सोन्माद १ उन्मदिष्णु २ ॥

–दविनीतः समुद्धतः ।

अन्यायी पुरुषके नाम २–अविनीत १ समुद्धत २ ॥

मत्ते शौण्डोत्कटक्षीबाः–

मतवालेके नाम ४–मत्त १ शौण्ड २ उत्कट ३ क्षीब ४ ॥

–कामुके कमिताऽनुकः ॥ २३ ॥

कम्रः कामयिताभीकः कमनः कामनोऽभिकः ।

कामीके नाम ९–कामुक १ कमितृ २ अनुक ३ ॥ २३ ॥ कम्र ४ कामयितृ ५ अभीक ६ कमन ७ कामन ८ अभिक ९ ॥

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥

वचन ग्रहण करनेवाले पुरुषके नाम ४–विधेय १ विनयग्राहिन् २ वचनेस्थित ३ आश्रव ४ ॥ २४ ॥

वश्यः प्रणेयो–

वशीभूतके नाम २–वश्य १ प्रणेय २ ॥

–निभृतविनीतप्रश्रिताः समाः ।

नम्र पुरुषके नाम ३–निभृत १ विनीत २ प्रश्रित ३ ॥

धृष्टे धृष्णग्वियातश्च–

धीठ पुरुषके नाम ३–धृष्ट १ धृष्णज् २ वियात ३ ॥

प्रगल्भः प्रतिभान्विते ॥ २५ ॥

अति धीठ निर्भर पुरुषके नाम २–प्रगल्भ १ प्रतिभान्वित २ ॥ २५ ॥

स्यादधृष्टे तु शालीनो–

लज्जावान् पुरुषके नाम २–अधृष्ट १ शालीन २ ॥

विलक्षो विस्मयान्विते ।

अचम्भेमें पड़े हुए पुरुषके नाम२–विलक्ष १ विस्मयान्वित २ ॥

अधीरे कातर–

व्याकुल हुए पुरुषके नाम२–अधीर १ कातर १ ॥

–स्त्रस्ते भीरुभीरुकभीलुकाः॥२६॥

डरपोकके नाम ४–त्रस्त १ भीरु२ भीरुक ३ भीलुक ४ ॥ २६ ॥

आशंसुराशंसितरि–

इष्ट अर्थप्राप्तिकी इच्छावाले पुरुषके नाम २–आशंसु १ आशंसितृ २ ॥

–गृहयालुर्ग्रहीतरि ।

लेनेके स्वभाववाले पुरुषके नाम२–गृहयालु १ ग्रहीतृ २ ॥

श्रद्धालुः श्रद्धया युक्ते–

श्रद्धायुक्त स्वभाववाले पुरुषका नाम १–श्रद्धालु १ ॥

–पतयालुस्तु पातुके ॥ २७ ॥

गिरनेके स्वभाववाले पुरुषके नाम २–पतयालु १ पातुक २ ॥ २७ ॥

लज्जाशीलेऽपत्रपिष्णु–

लज्जाशील पुरुषके नाम २–लज्जाशील १ अपत्रपिष्णु २ ॥

–वन्दारुरभिवादके ।

वन्दना करनेके स्वभाववाले पुरुषके नाम२–वन्दारु १ अभिवादक २ ॥

शरारुर्घातुको हिंस्रः–

हिंसा करनेके स्वभाववाले पुरुषके नाम ३–शरारु १ घातुक २ हिंस्र ३॥

–स्याद्वर्द्धिष्णुस्तु वर्धनः ॥२८॥

बढ़नेके स्वभाववाले पुरुषके नाम२–वार्द्धिष्णु १ वर्धन २ ॥ २८ ॥

उत्पतिष्णुस्तूत्पतिता–

कूदनेके स्वभाववालेके नाम २–उत्पतिष्णु १ उत्पतितृ २ ॥

–ऽलंकरिष्णुस्तु मण्डनः ।

भूषण आदि पहरनेके स्वभाववालेके नाम २–अलंकरिष्णु १ मंडन २ ॥

भूष्णुर्भविष्णुर्भविता–

होनेके स्वभाववालेके नाम ३–भूष्णु १ भविष्णु २ भवितृ ३ ॥

वर्तिष्णुर्वर्तनः समौ ॥ २९ ॥

बर्त्ताव करनेके स्वभाववालेके नाम २–वर्तिष्णु १ वर्त्तन २ ॥ २९ ॥

निराकरिष्णुः क्षिप्नुः स्यात्–

तिरस्कार करनेके स्वभाववालेके नाम २–निराकरिष्णु १ क्षिप्नु २ ॥

–सान्द्रस्निग्धस्तु मेदुरः ।

सघन और चिकनेका नाम १–मेदुर १ ॥ १ ॥

ज्ञाता तु विदुरो विन्दु–

जाननेके स्वभाववालेके नाम ३–ज्ञातृ १ विदुर २ विन्दु ३ ॥

विकासी तु विकस्वरः ॥ ३० ॥

खिलनेके स्वभाववालेके नाम २–विकासिन् १ विकस्वर २ ॥ ३० ॥

विसृत्वरो विसृमरः प्रसारी च विसारिणि ।

फलनेके स्वभाववालेके नाम ४–विसृत्वर १ विसृमर २ प्रसारिन् ३ विसारिन् ४ ॥

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥

सहनशीलवालेके नाम ६–सहिष्णु १ सहन २ क्षन्तृ ३ तितिक्षु ४ क्षमितृ ५ क्षमिन् ६ ॥ ३१ ॥

क्रोधनोऽमर्षणः कोपी–

क्रोधके स्वभाववालेके नाम ३–क्रोधन १ अमर्षण २ कोपिन् ३ ॥

–चण्डस्त्वत्यन्तकोपनः ।

अत्यन्त क्रोधके स्वभाववालेके नाम २–चण्ड १ अत्यन्तकोपन २ ॥

जागरूको जागरिता–

जागनेके स्वभाववालेके नाम २–जागरूक १ जागरितृ २ ॥

–घूर्णितः प्रचलायितः ॥ ३२॥

घूरनेवालेके नाम २–घूर्णित १ प्रचलायित २ ॥ ३२ ॥

स्वप्नक्छयालुर्निद्रालु–

निद्रालुके नाम ३–स्वप्नज् १ शयालु २ निद्रालु ३ ॥

–निद्राणशयितौ समौ ।

शयन करनेवालेके नाम २–निद्राण १ शयित २ ॥

पराङ्मुखः पराचीनः–

विमुखके नाम २–पराङ्मुख १ पराचीन २ ॥

–स्यादवाङप्यधोमुखः ॥ ३३ ॥

नीचेको मुख करनेवालेके नाम २–अवाच् १ अधोमुख २ ॥ ३३ ॥

देवानञ्चति देवद्र्यङ्–

देवताओंकी पूजा करनेवालेका नाम १–देवद्र्यच् १ ॥

–विष्वद्र्यङ् विष्वगञ्चति ।

सब ओर जानेवालेका नाम १–विष्वद्र्यच् १ ॥

यः सहाञ्चति सध्र्यङ् सः–

साथ रहनेवालेका नाम १–सध्र्यच् १॥

–स तिर्यङ् यस्तिरोऽञ्चति ॥३४॥

टेढ़े चलनेवालेका नाम १–तिर्यच् १ ॥ ३४ ॥

वदो वदावदो वक्ता–

वक्ताके नाम ३–वद १ वदावद २ वक्तृ ३ ॥

–वागीशो वाक्पतिः समौ ।

चातुर्ययुक्त बोलनेवालेके नाम २–वागीश १ वाक्पति २ ॥

वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ॥ ३५ ॥

शास्त्रानुसार अत्यन्त बोलनेवालेके नाम ४–वाचोयुक्तिपटु १ वाग्मिन् २ वावदूक ३ अतिवक्तृ ४ ॥ ३५ ॥

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।

अतिनिन्दित भाषण करनेवालेके नाम ४–जल्पाक १ वाचाल २ वाचाट ३ बहुगर्ह्यवाच् ४ ॥

दुर्मुखे मुखराबद्धमुखौ–

अप्रिय बोलनेवालेके नाम ३–दुर्मुख १ मुखर २ अबद्धमुख ३ ॥

शक्लः प्रियंवदे ॥ ३६ ॥

प्रिय बोलनेवालेके नाम २–शक्ल १ प्रियंवद २ ॥ ३६ ॥

लोहलः स्यादस्फुटवा–

जो स्फुट न बोलता हो उस पुरुषके नाम २–लोहल १ अस्फुटवाच् २ ॥

–ग्गर्ह्यवादी तु कद्वदः ।

निन्दित वाक्य बोलनेवाले पुरुषके नाम २–गर्ह्यवादिन् १ कद्वद २ ॥

समौ कुवादकुचरौ–

बुराई कहनेवालेके नाम २-कुवाद १ कुचर २ ॥

–स्यादसौम्यस्वरोऽस्वरः ॥३७॥

रूखे स्वरवालेके नाम २–असौम्यस्वर १ अस्वर २ ॥ ३७ ॥

रवणः शब्दनो–

चिल्लानेवालेके नाम २–रवण १ शब्दन २ ॥

–नान्दीवादी नान्दीकरः समौ ।

नान्दीवादी अर्थात् नाटकके आरम्भमें स्तुतिविशेष करनेवालेके नाम २–नान्दीवादिन् १ नान्दीकर २ ॥

जडोऽज्ञ–

महामूर्खके नाम २–जड १ अज्ञ २ ॥

–एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥ ३८ ॥

जो गूंगा बहिरा दोनों हो उसका नाम १—एडमूक १ ॥ ३८ ॥

तूष्णींशीलस्तु तूष्णीको—

मौन रहनेवाले पुरुषके नाम २—तूष्णींशील १ तूष्णीक २ ॥

—नग्नोऽवासा दिगम्बरे ।

नग्न पुरुषके नाम ३—नग्न १ अवासस् २ दिगम्बर ३ ॥

निष्कासितोऽवकृष्टः स्या—

निकाले हुएके नाम २—निष्कासित १ अवकृष्ट २ ॥

—दपध्वस्तस्तुधिक्कृतः ॥ ३९ ॥

धिक्कार दिये हुए पुरुषके नाम २—अपध्वस्त १ धिक्कृत २ ॥ ३९ ॥

आत्तगर्वोऽभिभूतः स्या—

तिरस्कारको प्राप्त हुए पुरुषके नाम२—आत्तगर्व १ अभिभूत २ ॥

—द्दापितः साधितः समौ ।

धनादि दिलाकर वशमें किये हुए पुरुषके नाम२—दापित १ साधित २ ॥

प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥ ४० ॥

निरादरको प्राप्त हुए पुरुषके नाम ४—प्रत्यादिष्ट १ निरस्त २ प्रत्याख्यात ३ निराकृत ४ ॥ ४० ॥

निकृतः स्याद्विप्रकृतो—

बुरे रूपवालेके नाम २—निकृत १ विप्रकृत २ ॥

—विप्रलब्धस्तु वञ्चितः ।

ठगे हुए पुरुषके नाम२—विप्रलब्ध १ वञ्चित २ ॥

मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ ४१ ॥

मनोहत पुरुषके नाम४—मनोहत १ प्रतिहत २ प्रतिबद्ध ३ हत४ ॥ ४१ ॥

अधिक्षिप्तः प्रतिक्षिप्तो—

जिसके ऊपर आक्षेप किया गया हो उस पुरुषके नाम २—अधिक्षिप्त १ प्रतिक्षिप्त २ ॥

—बद्धे कीलितसयंतौ ।

बांधे हुएके नाम ३—बद्ध१कीलित२ संयत ३ ॥

आपन्न आपत्प्राप्तः स्यात्—

आपत्तिको प्राप्त हुए पुरुषके नाम २—आपन्न १ आपत्प्राप्त २ ॥

कांदिशीको भयद्रुतः ॥ ४२ ॥

भयसे भागे हुएके नाम २—कांदिशीक १ भयद्रुत २ ॥ ४२ ॥

आक्षारितः क्षारितोऽभिशस्ते—

मैथुनके निमित्त वृथा दोष लगाये हुए पुरुषके नाम ३—आक्षारित १ क्षारित २ अभिशस्त ३ ॥

–संकसुकोऽस्थिरे ।

चंचल स्वभाववाले पुरुषके नाम२–संकसुक १ अस्थिर २ ॥

व्यसनार्तोपरक्तौ द्वौ–

दैवी और मानुषी पीड़ासे युक्त पुरुषके नाम २–व्यसनार्त्त १ उपरक्त २ ॥

–विहस्तव्याकुलौ समौ ॥४३॥

शोकादिसे व्याकुल पुरुषके नाम २–विहस्त १ व्याकुल २ ॥ ४३ ॥

विक्लवो विह्वलः–

विकल पुरुषके नाम २–विक्लव १ विह्वल २

–स्यात्तु विवशोऽरिष्टदुष्टधीः ।

मरणके समीप आनेसे जिसकी बुद्धि विपरीत हो जाय उस पुरुषके नाम २–विवश १ अरिष्टदुष्टधी ॥२॥

कश्यः कशार्हे–

बेत मारने योग्यके नाम २–कश्य १ कशार्ह २ ॥

–सन्नद्धे त्वाततायी वधोद्यते४४

मारनेको उद्यतका नाम १–आततायिन् १ ॥ ४४ ॥

द्वेष्ये त्वक्षिगतो–

द्वेष करने लायकके नाम २–द्वेष्य १ आक्षिगत २ ॥

–वध्यः शीर्षच्छेद्य इमौ समौ ॥

शिर काटने योग्यके नाम २–वध्य १ शीर्षच्छेद्य २ ॥

विष्यो विषेण यो वध्यो–

विषकरके मारने योग्यका नाम १–विष्य १ ॥

–मुसल्यो मुसलेन यः॥ ४५ ॥

मुसलसे मारने योग्यका नाम १–मुसल्य १ ॥ ४५ ॥

शिशिवदानोऽकृष्णकर्मा–

पापकर्म न करनेवाले पुरुषके नाम २–शिशिवदान १ अकृष्णकर्मन् २ ॥

–चपलश्चिकुरः समौ ।

विना दोष विचारे मारनेवालेके नाम २–चपल १ चिकुर २ ॥

दोषैकदृक्पुरोभागी–

केवल दोषकी ही दृष्टि करनेवालेके नाम २–दोषैकदृश् १ पुरोभागिन् २॥

–निकृतस्त्वनृजुः शठः॥ ४६ ॥

कुटिलहृदयके नाम ३–निकृत १ अनृजु २ शठ ३ ॥ ४६ ॥

कर्णेजपः सूचकः स्यात्–

चुगलखोरके नाम २–कर्णेजप १ सूचक २ ॥

–पिशुनो दुर्जनः खलः ।

आपसमें भेद करानेवालेके नाम ३–पिशुन १ दुर्जन २ खल ३ ॥

नृशंसो घातुकः क्रूरः पापो–

घातक अथवा कठोर पुरुषके नाम ४-नृशंस १ घातुक २ क्रूर ३ पाप ४ ॥

–धूर्तस्तु वञ्चकः ॥ ४७ ॥

ठगके नाम २-धूर्त १ वञ्चक २॥४७॥

अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

मूर्खके नाम ६–अज्ञ १ मूढ २ यथाजात ३ मूर्ख ४ वैधेय ५ बालिश ६ ॥

कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८ ॥

कृपणके नाम ५–कदर्य १ कृपण २ क्षुद्र ३ किंपचान ४ मितम्पच ५॥४८॥

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।

दरिद्र पुरुषके नाम ५–निःस्व १ दुर्विध २ दीन ३ दरिद्र ४ दुर्गत ५ ॥

वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥

मांगनेवालेके नाम ५–वनीयक १ याचनक २ मार्गण ३ याचक ४ अर्थिन् ५ ॥ ४९ ॥

अहंकारवानहंयुः–

अहंकारयुक्त पुरुषके नाम २–अहंकारवत् १ अहंयु २ ॥

–शुभंयुस्तु शुभान्वितः ।

शुभयुक्त पुरुषके नाम २–शुभंयु १ शुभान्वित २ ॥

दिव्योपपादुका देवा–

देवताओंका नाम १–दिव्योपपादुक १ ॥

–नृगवाद्या जरायुजाः ॥ ५० ॥

मनुष्य, गौ आदि 'जरायुज' कहलाते हैं ॥ ५० ॥

स्वेदजाः कृमिदंशाद्याः–

कीडा और डांस आदि 'स्वेदज' कहलाते हैं ॥

–पक्षिसर्पाद्योऽण्डजाः ।

पक्षी, सर्पादि 'अण्डज' कहलाते हैं ॥

(इति प्राणिवर्गः)

उद्भिदस्तरुगुल्माद्या–

वृक्ष, वेल, घास आदि 'उद्भिद्' कहलाते हैं ॥

उद्भिदुद्भिज्जमुद्भिदम् ॥ ५१ ॥

उद्भिद्के नाम ३–उद्भिद् १ उद्भिज्ज २ उद्भिद ३ ॥ ५१ ॥

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् । कांतं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५२ ॥

सुन्दरके नाम १२–सुन्दर १ रुचिर २

चारु ३ सुषम ४ साधु ५ शोभन ६ कान्त ७ मनोरम ८ रुच्य ९ मनोज्ञ १० मञ्जु ११ मंजुल १२ ॥ ५२ ॥

तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।

जिसके देखनेसे तृप्तिके अन्तको प्राप्त न हो उसका नाम १—आसेचनक १ ॥

अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥

प्रियके नाम ६—अभीष्ट १ अभीप्सित २ हृद्य ३ दयित ४ वल्लभ ५ प्रिय ६ ॥ ५३ ॥

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः । कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥ ५४ ॥

अधमके नाम १३—निकृष्ट १ प्रतिकृष्ट २ अर्वन् ३ रेफ ४ याप्य ५ अवम ६ अधम ७ कुपूय ८ कुत्सित ९ अवद्य १० खेट ११ गर्ह्य १२ अणक १३॥५४॥

मलीमसं तु मलिनं कच्चरं मलदूषितम् ।

मलिनके नाम ४—मलीमस १ मलिन २ कच्चर ३ मलदूषित ४ ॥

पूतं पवित्रं मेध्यं च—

पवित्रके नाम ३—पूत १ पवित्र २ मेध्य ॥ ३ ॥

—वीध्रं तु विमलार्थकम् ॥५५॥

स्वभावसे निर्मलके नाम २—वीध्र १ विमलार्थक २ ॥ ५५ ॥

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।

शुद्ध किये हुएके नाम ५—निर्णिक्त १ शोधित २ मृष्ट ३ निःशोध्य ४ अनवस्कर ५ ॥

—असारं फल्गु—

असार वस्तुके नाम २—असार १ फल्गु २ ॥

—शून्यं तु वशिकं तुच्छरिक्तके ॥ ५६ ॥

शून्यके नाम ४—शून्य १ वशिक २ तुच्छ ३ रिक्तक ४ ॥ ५६ ॥

क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः । मुख्यवर्यवरेण्याश्च प्रवर्होऽनवरार्ध्यवत् ॥ ५७ ॥ परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।

प्रधानके नाम १७—प्रधान १ प्रमुख २ प्रवेक ३ अनुत्तम ४ उत्तम ५ मुख्य ६ वर्य्य ७ वरेण्य ८ प्रवर्ह ९ अनवरार्ध्य १० ॥ ५७ ॥ परार्ध्य ११ अग्र १२ प्राग्रहर १३ प्राग्र्य १४ अग्र्य १५ अग्रीय १६ अग्रिय १७ ॥ ५७ ॥

श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥ ५८ ॥

अति सुन्दरके नाम ५ श्रेयस् १–श्रेष्ठ २ पुष्कल ३ सत्तम ४ अतिशोभन ५ ॥ ५८ ॥

स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ ५९ ॥

व्याघ्र, पुंगव, ऋषभ, कुञ्जर, सिंह, शार्दूल, नागादि शब्दोंके उत्तर आनेसे श्रेष्ठ अर्थके वाचक होते हैं जैसे पुरुषव्याघ्र, द्विजपुङ्गव इत्यादि ॥ ५९ ॥

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।

अप्रधानके नाम ३–अप्राग्र्य १ अप्रधान २ उपसर्जन ३ ॥

विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥ वड्रोरुविपुलं–

चौड़ेके नाम ९–विशङ्कट १ पृथु २ बृहत् ३ विशाल ४ पृथुल ५ महत् ६ ॥ ६० ॥ वड्र ७ उरु ८ विपुल ९ ॥

–पीनपीव्नी तु स्थूलपीवरे ।

मोटेके नाम ४–पीन १ पीवन् २ स्थूल ३ पीवर ४ ॥

स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ॥ ६१ ॥ स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः ।

थोड़ेके नाम १४–स्तोक १ अल्प २ क्षुल्लक ३ सूक्ष्म ४ श्लक्ष्ण ५ दभ्र ६ कृश ७ तनु ८ ॥ ६१ ॥ मात्रा ९ त्रुटि १० लव ११ लेश १२ कण १३ अणु १४ ॥

अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥ ६२ ॥

अति अल्पके नाम ४–अल्पिष्ठ १ अल्पीयस् २ कनीयस् ३ अणीयस् ४ ॥ ६२ ॥

प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु । पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥ ६३ ॥

बहुतके नाम १२–प्रभूत १ प्रचुर २ प्राज्य ३ अदभ्र ४ बहुल ५ बहु ६ पुरुहू ७ पुरु ८ भूयिष्ठ ९ स्फार १० भूयस् ११ भूरि १२ ॥ ६३ ॥

परःशताद्यास्ते येषां परा संख्या शतादिकात् ।

जिनकी संख्या शतसे अर्थात् सहस्रादिसे अधिक हो वह परःशत आदि कहलाते हैं ।

गणनीये तु गणेयं–

गिननेयोग्य वस्तुके नाम २–गणनीय १ गणेय २ ॥

–संख्याते गणित–

गिने हुएके नाम २–संख्यात १ गणित २ ॥

-मथ समं सर्वम् ॥ ६४ ॥ विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् । समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥ ६५ ॥

सम्पूर्णके नाम १४–सम १ सर्व २ ॥६४॥ विश्व ३ अशेष ४ कृत्स्न ५ समस्त ६ निखिल ७ अखिल ८ निःशेष ९ समग्र १० सकल ११ पूर्ण १२ अखण्ड १३ अनूनक १४ ॥ ६५ ॥

घनं निरन्तरं सान्द्रं-

घनेके नाम ३–घन १ निरन्तर २ सान्द्र ३ ॥

-पेलवं विरलं तनु ।

–छितरे (छीदे) के नाम ३–पेलव १ विरल २ तनु ३ ॥

समीपे निकटासन्नसन्निकृष्ट-सनीडवत् ॥ ६६ ॥ सदेशाभ्याशसविधसमर्यादसवेशवत् । उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ॥ ६७ ॥

समीपके नाम १५–समीप १ निकट २ आसन्न ३ सन्निकृष्ट ४सनीड ५॥६६॥ सदेश ६ अभ्याश ७ सविध ८ समर्याद ९ सवेश १० उपकण्ठ११ अन्तिक१२ अभ्यर्ण १३ अभ्यग्र १४ अभितः १५ ॥ ६७ ॥

संसक्ते त्वव्यवहितमपदान्तरमित्यपि ।

मिले हुएके नाम ३–संसक्त१अव्यवहित २ अपदान्तर ३ ॥

नेदिष्ठमन्तिकतमं-

अतिसमीपके नाम २–नेदिष्ठ १ अन्तिकतम २ ॥

–स्याद्दूरं विप्रकृष्टकम् ॥६८॥

दूरके नाम २–दूर१विप्रकृष्ट२॥६८॥

दवीयश्च दविष्ठं च सुदूरं-

अत्यन्त दूरके नाम २–दवीयस् १ दविष्ठ २ सुदूर ३ ॥

–दीर्घमायतम् ।

लम्बेके नाम २–दीर्घ १आयत २॥

वर्तुलं निस्तलं वृत्तं-

गोलके नाम ३–वर्तुल १ निस्तल२ वृत्त ३ ॥

बन्धुरं तून्नतानतम् ॥ ६९ ॥

ऊँचेनीचेके नाम २–बन्धुर १ उन्नतानत २ ॥ ६९ ॥

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे-

ऊंचेके नाम ६–उच्च १ प्रांशु२ उन्नत ३ उदग्र ४ उच्छ्रित ५तुङ्ग ६॥

–ऽथ वामने । न्यङ्नीचखर्वह्रस्वाः स्यु-

बौने पुरुषके नाम ५–वामन १ न्यक् २ नीच ३ खर्व ४ ह्रस्व ५ ॥

खाग्रेऽवनतानतम् ॥ ७० ॥

नमे हुएके नाम ३—अवाग्र १ अवनत २ आनत ३ ॥ ७० ॥

अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् । आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ ७१ ॥

टेढ़ेके नाम ११—अराल १ वृजिन २ जिह्म ३ ऊर्मिमत् ४ कुञ्चित ५ नत ६ आविद्ध ७ कुटिल ८ भुग्न ९ वेल्लित १० वक्र ११ ॥ ७१ ॥

ऋजावजिह्मप्रगुणौ—

सीधेके नाम ३—ऋजु १ अजिह्म २ प्रगुण ३ ॥

—व्यस्ते त्वप्रगुणाकुलौ ।

व्याकुलके नाम ३—व्यस्त १ अप्रगुण २ आकुल ३ ॥

शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ॥ ७२ ॥

नित्यके नाम ५—शाश्वत १ ध्रुव २ नित्य ३ सदातन ४ सनातन ५ ॥७२॥

स्थास्नुः स्थिरतरः स्थेया—


बुधवृद्धौ पण्डितेऽपि–

बुध–पण्डित तथा एक ग्रह, तथा वृद्ध पुरुष ॥

–स्कन्धः समुदयेऽपि च १००॥

स्कन्ध–समुदय, समूह, काण्ड, राजा तथा कन्धा ॥ १०० ॥

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।

सिंधु–समुद्र, एक नद, सिंधुदेश तथा नदी ॥

विधा विधौ प्रकारे च–

विधा–विधान प्रकार तथा बड़ाई ॥

–साधू रम्येऽपि च त्रिषु॥१०१

साधु–साधु, कुलीन, सुंदर, रोजगारी तथा सज्जन ॥ १०१ ॥

वधूर्जाया स्नुषा स्त्री च–

वधू–स्त्री,(विवाहिता स्त्री) पुत्रकी बहू, सवरग ओषधी ॥

–सुधा लेपोऽमृतं स्नुही ।

–सुधा–अमृत, चूना, बिजली भोजन, अँवरा, सेहुँड ॥

सन्धा प्रतिज्ञा मर्यादा–

संधा–प्रतिज्ञा, अंगीकार, मर्यादा ॥

–श्रद्धा संप्रत्ययः स्पृहा १०२॥

श्रद्धा–आदर, आकांक्षा तथा विश्वास ॥ १०२ ॥

मधु मद्ये पुष्परसे क्षौद्रे–

मधु–मद्य, पुष्परस, शहद, चैत्र तथा महुआ ॥

–ऽप्यन्धं तमस्यपि ॥

अन्ध–अन्धा तथा अँधियारा ॥

अतस्त्रिषु–

यहांसे लेकर धांतवर्गपर्यंत शब्द तीनों लिंगोंमें होते हैं ॥

गंधन–सूचना करना वा चुगलीखाना, हिंसा तथा उत्साह देना वा भरोसा देना ।

आतञ्चनं प्रतीवापजवनाप्यायनार्थकम् ॥ ११५ ॥

आतञ्चन–वेग, तप करना तथा दूधमें मट्ठा डालना ॥ ११५ ॥

व्यञ्जनं लाञ्छनं श्मश्रुनिष्ठानावयवेष्वपि ।

व्यञ्जन–चिह्न, दाढ़ी मूछ, निष्ठान तथा अङ्ग ॥

स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ॥ ११६ ॥

कौलीन–लोकापवाद वा लोकनिंदा तथा पशु सर्प पक्षीका युद्ध ॥ ११६ ॥

स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।

उद्यान–बगीचा, निकलना तथा प्रयोजन ॥

अवकाशे स्थितौ स्थानं–

स्थान–अवकाश और स्थिति ॥

–क्रीडादावपि देवनम् ॥११७॥

देवन–क्रीडा, व्यवहार तथा जीतनेकी इच्छा ॥ ११७ ॥

उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमेऽपि च ।

उत्थान–उठना वा खडा होना, उद्योग, कुटुम्बकार्य, सिद्धान्त तथा उत्तम औषध ।

व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ॥ ११८ ॥

व्युत्थान–तिरस्कार या अनादर, विरोध करना तथा स्वतन्त्रतासे काम करना ॥ ११८ ॥

मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने । निर्वर्तनोपकरणानुव्रज्यासु च साधनम् ॥ ११९ ॥

साधन–पारा इत्यादि रसायनका बनाना, चलना, पृथ्वी, जल इत्यादि द्रव्य, धन दौलत दिलवाना, धन इत्यादिका पैदा करना, उपाय, पीछे पीछे चलना, पुरुषकी मूत्रइंद्रिय, तथा मृतक वा अग्निसंस्कार ॥ ११८ ॥

निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।

निर्यातन–वैरशोधन, दान तथा धरोहर देना ॥

व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥ १२० ॥

व्यसन–विपत्ति, भ्रंश,नाश वा पतन, कामज दोष तथा कोपज दोष ॥ १२० ॥

पक्ष्माक्षिलोम्नि किंजल्के तन्त्वाद्यंशेऽप्यणीयसि ।

पक्ष्मन्–नेत्रोंके पलक, केसर, सूतका टुकड़ा, अतिअल्प ॥

तिथिभेदे क्षणे पर्व–

पर्वन्–अष्टमी दर्श आदि तिथि, उत्सव ॥

–वर्त्मनेत्रच्छदेऽध्वनि ॥ १२१ ॥

वर्त्मन्–मार्ग वा रास्ता तथा आंखके पलक ॥ १२१ ॥

अकार्यगुह्ये कौपीनं–

कौपीन–अकार्य और गुह्य तथा कौपीन ॥

–मैथुनं संगतौ रते ।

मैथुन–स्त्री पुरुषका संयोग तथा रति ॥

प्रधानं परमात्मा धीः–

प्रधान–प्रधान वा मुख्य तथा राजाका मुख्य सहाय, परमात्मा, बुद्धि ॥

–प्रज्ञानं बुद्धिचिह्नयोः ॥ १२२ ॥

प्रज्ञान–बुद्धि और चिह्न ॥ १२२ ॥

प्रसूनं पुष्पफलयो–

प्रसून–फूल तथा फल ॥

–र्निधनं कुलनाशयोः ।

निधन–कुल और नाश ॥

क्रन्दने रोदनाह्वाने–

क्रन्दन–रोना, पुकारना तथा योद्धाओंका धमकीसे ललकारना ॥

–वर्ष्म देहप्रमाणयोः ॥ १२३ ॥

वर्ष्मन्–शरीर वा देह तथा प्रमाण वा माप ॥ १२३ ॥

गृहदेहत्विट्प्रभावा धामा–

धामन्–घर, देह, प्रभा वा प्रकाश तथा प्रभाव ॥

–न्यथ चतुष्पथे । संनिवेशे च संस्थानं–

संस्थान–किसी वस्तुके अवयवोंका विभाग तथा चौराहा और मरना वा नाश ॥

–लक्ष्म चिह्नप्रधानयोः ॥ १२४ ॥

लक्ष्मन्–चिह्न तथा प्रधान वा मुख्य ॥ १२४ ॥

आच्छादने संपिधानमपवारणमित्युभे ।

आच्छादन–ढाकना, छिपना, वस्त्र इत्यादिसे वेष्टन, वस्त्र तथा गुप्त होना ॥

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ॥ १२५ ॥

आराधन–सन्तुष्ट करना, सिद्ध करना तथा लाभ ॥ १२५ ॥

अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ॥

अधिष्ठान–पहिया, नगर, आक्रमण वा अमलमें कर लेना ॥

रत्नं स्वजातिश्रेष्ठेऽपि–

रत्न—जवाहिर तथा स्वजातिमें श्रेष्ठ वा उत्तम ॥

—वने सलिलकानने ॥ १२६ ॥

वन—पानी और वन ॥ १२६ ॥

तलिनं विरले स्तोके—

तलिन—विरल तथा थोड़ा ॥

—वाच्यलिङ्गं तथोत्तरे ।

यहांसे नांतवर्गकी समाप्ति पर्य्यन्त संपूर्ण शब्द वाच्यलिंग होते हैं ॥

समानाः सत्समैके स्युः—

समान—पंडित, सम और एक ॥

—पिशुनौ खलसूचकौ ॥ १२७ ॥

पिशुन—सूचक वा चुगलखोर तथा खल ॥ १२७ ॥

हीनन्यूनावूनगर्ह्यौ—

हीन—थोड़ा, त्याग किया गया, न्यून—निन्दा करने योग्य व किसी वस्तुसे रहित ॥

—वेगिशूरौ तरस्विनौ ।

तरस्विन्—वेगवाला तथा शूर ॥

अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गतावपि ॥ १२८ ॥

अभिपन्न—अपराधी, जीता गया तथा विपत्तिको प्राप्त हुआ ॥ १२८ ॥

॥ इति नान्ताः ॥

कलापो भूषणे बर्हे तूणीरे संहतावपि ।

कलाप—समूह, मोरकी पूँछ, कोंधनी तथा गहना और तरकस ॥

परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥ १२९ ॥

परीवाप—तंबू कनात इत्यादि सामग्री तथा बीजका बोना और थाला ॥ १२९ ॥

गोधुग्गोष्ठपती गोपौ—

गोप—अहीर, गन्धरस, अनेक कामोंको करनेवाला वा कामदार ॥

—हरविष्णू वृषाकपी ।

वृषाकपी—महादेव तथा विष्णु ॥

बाष्पमूष्माश्रु—

बाष्प—भाफ अर्थात् गरम वस्तुपर पानी डालनेसे धुआंके सदृश ऊपर उठती हुई वस्तु, आंसू, गरमी ॥

—कशिपु त्वन्नमाच्छादनं द्वयम् ॥ १३० ॥

कशिपु—भोजन, अन्न, वस्त्र तथा तकिया ॥ १३० ॥

तल्पं शय्याट्टदारेषु—

तल्प—खाट, अटारी तथा दारा ॥

—स्तम्बेऽपि विटपोऽस्त्रियाम् ।

विटप—शाखा पत्ता इत्यादिका समूह, घास तृण इत्यादिका गुच्छा, वृक्ष वा पेड़ ॥

प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ॥ १३१ ॥ भेद्यलिंगा अमी–

प्राप्तरूप, स्वरूप, अभिरूप-पंडित तथा सुन्दर ॥ १३१ ॥

–कूर्मी वीणाभेदश्च कच्छपी ।

कच्छपी–कछुही और सारस्वती वीणा ॥

इति पांताः ॥

रवर्णे पुंसि रेफः स्यात्कुत्सिते वाच्यलिंगकः ॥ १३२ ॥

रेफ–अधम वा नीच तथा रेफ वा हल् रकार एक वर्ण ॥ १३२ ॥

इति फांताः ॥

अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ।

गन्धर्व–विश्वावसु इत्यादि स्वर्गके गवैये, घोड़ा, एक प्रकारका गन्धयुक्त मृग, मनुष्यादि प्राणी ॥

कम्बुर्ना वलये शंखे–

कम्बु–शंख, कंकण वा कंगन ॥

–द्विजिह्वौ सर्पसूचकौ ॥ १३३ ॥

द्विजिह्व–सर्प तथा चुगलखोर ॥१३३॥

पूर्वोऽन्यलिंगः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ॥

पूर्व–पहिला (ली), पूर्वपुरुष अर्थात् पुरुखा, ब्रह्मा, पूर्वदिशा तथा पहिले ॥

इति बान्ताः ॥

कुम्भौ घटेभमूर्धांशौ–

कुम्भ–गूगलका वृक्ष, घड़ा, हाथीका मस्तक, अंश, कुम्भराशि ॥

–डिम्भौ तु शिशुबालिशौ ॥ १३४ ॥

डिम्भ–बालक तथा मूर्ख ॥१३४॥

स्तम्भौ स्थूणाजडीभावौ–

स्तम्भ–खम्भ, ठगमुरी ॥

–शम्भू ब्रह्मत्रिलोचनौ ।

शम्भु–ब्रह्मा और शिव ॥

कुक्षिभ्रूणार्भका गर्भा–

गर्भ–स्त्रीके पेटका गर्भ, पेट, बालक नाट्यकी तीसरी संधि ॥

–विस्रम्भः प्रणयेऽपि च ॥ १३५ ॥

विस्रम्भ–शृङ्गारकी प्रार्थना और विश्वास ॥ १३५ ॥

स्याद्भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ।

दुन्दुभि–नगाड़ा तथा लड़कोंका एक प्रकारका खिलौना ॥

स्यान्महारजने क्लीबं कुसुम्भं करके पुमान् ॥ १३६ ॥

कुसुम्भ–कमण्डलु, कुसुम्भका फूल ॥ १३६ ॥

क्षरित्रियेऽपि च नाभिर्ना–

नाभि—ठोड़ी, क्षत्रिय, मुख्य राजा, रथके चक्रका मध्यभाग और कस्तूरी ॥

सुरभिर्गवि च स्त्रियाम् ।

सुरभि—सुन्दर वा मनोहर,सुगंधयुक्त प्रसिद्ध,चंपा (पुष्पवृक्ष), वसन्तऋतु, जायफल, कामधेनु, सलईवृक्ष, सुवर्ण वा सोना तथा कमल (पुष्पवृक्ष) ॥

सभा संसदि सभ्ये च-

सभा—सभा तथा घर ॥

—त्रिष्वध्यक्षेऽपि वल्लभः॥१३७॥

वल्लभ—प्यारा-री, स्त्रीका पति,अध्यक्ष वा मालिक तथा कुलीन घोड़ा॥१३७॥

इति भांताः ॥

किरणप्रग्रहौ रश्मी-

रश्मि—किरण वा प्रकाश तथा लगाम।

—कपिभेकौ प्लवंगमौ ।

प्लवंगम—वानर तथा मेंढक ॥

इच्छामनोभवौ कामौ-

काम—इच्छा और काम ॥

—शौर्योद्योगौ पराक्रमौ॥१३८॥

पराक्रम—शूरता तथा उद्योग ॥ १३८ ॥

धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः ।

धर्म—पुण्य,यमराज, न्याय, स्वभाव, आचार तथा सोमयज्ञ करके सोमवल्लीका रस पीनेवाला ॥

उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ॥ १३९ ॥

उपक्रम—उपायपूर्वक प्रारम्भ, प्रारंभ तथा रिसवत ॥ १३९ ॥

वणिक्पथः पुरं वेदो निगमो-

निगम—व्यापार, शहर तथा वेद ।

--नागरो वणिक् । नैगमौ द्वौ-

नैगम—वेदसम्बन्धि वस्तु, नगरका रहनेवाला तथा बनियां और उपनिषद् ॥

—बले रामो नीलचारुसिते त्रिषु ॥ १४० ॥

राम—सुंदर वा मनोहर, नीली वस्तु, श्वेत वस्तु तथा परशुराम, रामचन्द्र, बलराम ॥ १४० ॥

शब्दादिपूर्वो वृन्देऽपि ग्रामः--

ग्राम—(पु०) गांव, (इस शब्दके पूर्वमें जब"शब्द"इत्यादि शब्द रहते हैं तब यह समूहवाची होता है, जैसा-शब्दग्राम, स्वरग्राम, यह शब्द कहीं स्वरवाची भी है) ।

--क्रान्तौ च विक्रमः ।

विक्रम—विक्रमण तथा पराक्रम ॥

स्तोमः स्तोत्रेऽध्वरे वृन्दे--

स्तोम—समूह तथा स्तोत्र ॥

जिह्मस्तु कुटिलेऽलसे ॥१४१॥

जिह्म—कुटिल तथा आलसी और वक्र ॥ १४१ ॥

गुल्मा रुक्स्तम्बसेनाश्च—

गुल्म—पिलही रोग, विना डालीका वृक्ष तथा एक प्रकारकी सेना ॥

जामिः स्वसृकुलस्त्रियोः ।

जामि—बहिन, तथा कुलस्त्री ॥

क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ॥ १४२ ॥

क्षमा—पृथ्वी तथा क्षमा वा सहना ॥ १४२ ॥

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा ।

श्याम, श्यामा—हरा, कृष्णशतावरी और रात्रि ॥

ललामं पुच्छपुंड्राश्वभूषाप्राधान्यकेतुषु ॥ १४३ ॥

ललाम—पूंछ, घोड़ा, घोड़ेके माथेका एक चिह्न, घोड़ेका गहना, प्रधान वा मुख्य, मनोहर, प्रभाव, पुरुष तथा भूषण और अश्वलिंगी ॥ १४३ ॥

सूक्ष्ममध्यात्मम—

सूक्ष्म—छल तथा अध्यात्म ॥

—प्याद्यौ प्रधाने प्रथम—

प्रथम—पहिला—ली, तथा प्रधान वा मुख्य ॥

—स्त्रिषु ।

यहांसे लेकर मान्तपर्यंत सम्पूर्ण शब्द तीनों लिंगोंमें होते हैं ॥

वामौ वल्गुप्रतीपौ द्वा—

वाम—शोभित, उलटा तथा टेढ़ा ॥

वधमौ न्यूनकुत्सितौ ॥ १४४ ॥

अधम—न्यून तथा निन्दित १४४॥

जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ॥

यातयाम—पुराना—नी, (बासी अन्न इत्यादि) और भोजन करके त्याग किया गया—वा की गयी ॥

॥ इति मान्ताः ॥

तुरंगगरुडौ तार्क्ष्यौ—

तार्क्ष्य—घोड़ा तथा गरुड़ ॥

—निलयापचयौ क्षयौ ॥१४५॥

क्षय—नाश, प्रलय, क्षयरोग तथा घर ॥ १४५ ॥

श्वशुर्यौ देवरश्यालौ—

श्वशुर्य—देवर तथा साला ॥

भ्रातृव्यौ भ्रातृजद्विषौ ।

भ्रातृव्य—भतीजा तथा शत्रु ॥

पर्जन्यौ रसदब्देन्द्रौ—

पर्जन्य—शब्दित मेघ तथा इन्द्र ॥

—स्यादर्यः स्वामिवैश्ययोः १४६

अर्य—स्वामी तथा वैश्य ॥ १४६॥

तिष्यः पुष्ये कलियुगे--

तिष्य--पुष्य नक्षत्र और कलियुग ॥

--पर्यायोऽवसरे क्रमे ।

पर्याय--अवसर तथा क्रम ॥

प्रत्ययोऽधीनशपथज्ञानविश्वास-हेतुषु ॥ १४७ ॥ रन्ध्रे शब्दे--

प्रत्यय--अधीन,शपथ, ज्ञान, विश्वास तथा कारण॥१४७॥छिद्र और शब्द ॥

--ऽथानुशयो दीर्घद्वेषानुतापयोः।

अनुशय--बड़ा वैर तथा पश्चात्ताप ॥

स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते ॥ १४८ ॥

स्थूलोच्चय--पर्वतका बड़ा ढाँका, अपूर्णता, हाथियोंकी मध्यम गति अर्थात् न जल्दी न धीरे ॥ १४८ ॥

समयाः शपथाचारकालसिद्धान्तसंविदः ।

समय--काल वा समय, शपथ वा किरिया, आचार वा अपने मतके सदृश व्यवहार, सिद्धान्त अर्थात् निर्णय किया हुआ पदार्थ तथा बातचीत करना ॥

व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ॥ १४९ ॥

अनय--दुर्व्यसन, जुआ इत्यादि, दुष्ट भाग्य तथा विपत्ति और अनीति १४९॥

अत्ययोऽतिक्रमे कृच्छ्रदोषे दण्डे--

अत्यय--मरना, उल्लंघन, क्लेश-दोष तथा दण्ड और नाश ॥

ऽप्यथापदि । युद्धायत्योः संपरायः--

सम्पराय--आपत्ति, युद्ध तथा उत्तर-काल या अगाड़ीका समय ॥

--पूज्यस्तु श्वशुरेऽपि च॥१५०॥

पूज्य--पूजा वा आदर करनेके योग्य और ससुर ॥ १५० ॥

पश्चादवस्थायि बलं समवायश्च संनयौ ।

सन्नय--अच्छा न्याय करनेवाला, सेनाके पीछेकी सेना तथा समूह ॥

संघाते संनिवेशे च संस्त्यायः--

संस्त्याय--समूह,बैठक तथा विस्तार ।

--प्रणयास्त्वमी ॥ १५१ ॥ विस्रम्भयाच्ञाप्रेमाणः--

प्रणय--प्रेम वा प्रीति, मांगना तथा विश्वास ॥ १५१ ॥

--विरोधेऽपि समुच्छ्रयः ॥

समुच्छ्रय--ऊँचाई तथा विरोध ॥

विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥ १५२ ॥

विषय--जानी हुई वस्तु, रूप,

रस, गन्ध, स्पर्श, शब्द ये प्रत्येक विषय कहलाते हैं, देश, स्थान और आश्रय ॥ १५२ ॥

निर्यासेऽपि कषायोऽस्त्री-

कषाय-कैषेला रङ्गवाला-ली, कैषेला रङ्ग, काढ़ा, विलेपन तथा नया अंगराग अर्थात् टटका चन्दनादिक ॥

-सभायां च प्रतिश्रयः ।

प्रतिश्रय-सभा, आश्रय वा अवलम्बन तथा अंगीकार ॥

प्रायो भूम्न्यन्वगमने-

प्राय-संन्यासपूर्वक भोजनका त्याग, मृत्यु वा मरण और तुल्य ॥

-मन्युर्दैन्ये क्रतौ क्रुधि ॥१५३॥

मन्यु-क्रोध, दीनता वा गरीबी तथा चिन्ता वा शोक ॥ १५३ ॥

रहस्योपस्थयोर्गुह्यं-

गुह्य-छिपानेके योग्य तथा स्त्री वा पुरुषका मूत्रेन्द्रिय ॥

-सत्यं शपथतथ्ययोः ।

सत्य-सच्चा-सच्ची, सत्यभामा, सत्यता, कसम तथा सत्ययुग ॥

वीर्यं बले प्रभावे च-

वीर्य-बल और प्रभाव ॥

-द्रव्यं भव्ये गुणाश्रये ॥१५४॥

द्रव्य-धन, भव्य अर्थात् सुंदर और स्थिर ॥ १५४ ॥

धिष्ण्यं स्थाने गृहे भेऽग्नौ-

धिष्ण्य-स्थान, गृह, नक्षत्र तथा अग्नि ॥

-भाग्यं कर्म शुभाशुभम् ।

भाग्य-भाग्य वा पूर्वजन्मके किये हुए अच्छे वा बुरे कर्म ॥

कशेरुहेम्नोर्गाङ्गेयं-

गांगेय-गंगासम्बन्धी वस्तु, भीष्म कौरवके पितामह, सुवर्ण वा सोना, कसेरुफल वा कन्द ॥

-विशल्यादन्तिकाऽपि च १५५॥

विशल्या-गुडूची ओषधी, इन्द्रपुष्पी ओषधी, अग्निकी शिखा वा आगकी लपट तथा दन्तिका ओषधी ॥ १५५ ॥

वृषाकपायी श्रीगौर्यो-

वृषाकपायी-लक्ष्मी तथा पार्वती ॥

-रभिख्या नामशोभयोः ॥

अभिख्या-नाम तथा शोभा ॥

आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ॥ १५६ ॥ उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ।

क्रिया-क्रिया आरंभ, प्रायश्चित्त, शिक्षा, पूजन, विचार ॥ १५६ ॥ उपाय, कर्म, चेष्टा तथा दवाई करना ॥

छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ॥ १५७ ॥

छाया–सूर्यकी स्त्री वा शनैश्चरकी माता तथा शोभा और प्रतिबिम्ब ॥ १५७ ॥

कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।

कक्ष्या–राजाकी डेउढ़ी, स्त्रियोंके कमरका गहना, हाथीके मध्य शरीरका बन्धन ॥

कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ॥ १५८ ॥

कृत्या–धन, स्त्री, भूमि इत्यादि, फोड़नेके योग्य शत्रुका पौरुष इत्यादि, तामसी देवता जिसको लोग शत्रुपर चलाते हैं तथा क्रिया वा कर्म ॥ १५८ ॥

जन्यं स्याज्जनवादेऽपि–

जन्य–जो पैदा होता है, निन्दित वचन धरके अर्थात् दामादके पक्षवाले मित्र इत्यादि, बाजार तथा युद्ध ॥

–जघन्योऽन्त्येऽधमेऽपि च ।

जघन्य–सबसे पिछला–ली, अधम वा नीच तथा मूत्रेन्द्रिय ॥

गर्ह्याहीनौ च वक्तव्यौ–

वक्तव्य–बोलनेके योग्य, निन्दा करनेके योग्य, हीन अर्थात् किसी वस्तुसे रहित तथा अधीन वा परतन्त्र ॥

–कल्यौ सज्जनिरामयौ ॥ १५९ ॥

कल्य–कवच धारण करनेवाला योद्धा तथा नीरोग ॥ १५९ ॥

आत्मवाननपेतोऽर्थादर्थ्यौ–

अर्थ्य–अर्थसे च्युत वा दूर न हुआई, बुद्धिमान्–मती, और शिलाजीत ॥

–पुण्यं तु चार्वऽपि ।

पुण्य–पुण्यवान्, मनोहर तथा धर्म ।

–रूप्यं प्रशस्तरूपेऽपि–

रूप्य–रमणीय वा सुन्दर, रुपया वा चांदी, छपी हुई चांदी वा सोना अर्थात् चांदी वा सोनेका रुपया ॥

–वदान्यो वल्गुवागपि ॥ १६० ॥

वदान्य--दाता वा देनेवाला–ली, मीठा बोलनेवाला–ली ॥ १६० ॥

न्याय्येऽपि मध्यं–

मध्य–बिचला-ली वा बीचवाला–ली, अधम वा नीच, न्याययुक्त वा न्यायके सदृश, कमर तथा बीच ॥

–सौम्यं तु सुन्दरे सोमदैवते ।

सौम्य–सूधा–धी, सुन्दर, चन्द्रको निवेदन करनेके योग्य वस्तु, बुध (एक ग्रह) ॥

इति यांताः ॥

निवहावसरौ वारौ–

वार–सोम, मंगल, बुध इत्यादि ७ वार, अवसर तथा समूह ॥

—संस्तरौ प्रस्तराध्वरौ ॥१६१॥

संस्तर—कुशका बिछौना; बिछौना तथा यज्ञ ॥ १६१ ॥

गुरू गीष्पतिपित्राद्यौ—

गुरु—भारी, बृहस्पति, बडेलोग (पिता इत्यादि) ॥

—द्वापरौ युगसंशयौ ।

द्वापर—संशय (सन्देह) 'द्वापर' युग ॥

प्रकारौ भेदसादृश्ये—

प्रकार—भेद (तरह) तथा तुल्यता ॥

—आकाराविङ्गिताकृती॥१६२॥

आकार—चेष्टा तथा सूरत ॥१६२॥

किंशारू सस्यशूकेषू—

किंशारु—यव इत्यादिका टूँडा (सुईके तुल्य अग्रभाग) तथा बाण और कंक पक्षी ॥

—मरू धन्वधराधरौ ।

मरु—निर्जलदेश और पर्वत ॥

अद्रयो द्रुमशैलार्काः—

अद्रि—वृक्ष, पर्वत तथा सूर्य ॥

—स्त्रीस्तनाब्दौ पयोधरौ॥१६३॥

पयोधर—स्तन और मेघ ॥ १६३॥

ध्वान्तारिदानवा वृत्रा—

वृत्र—वृत्रासुर, (एक दैत्य) अन्धकार तथा शत्रु ॥

—बलिहस्तांशवः कराः ।

कर—हाथ, हाथीकी सूंड, किरण तथा महसूल वा कर ॥

प्रदरो भङ्गनारीरुग्बाणा—

प्रदर—स्त्रियोंका एक रोग (जिसके होनेसे मूत्रद्वारसे लोहू बहता है) भंग (भग्नता) तथा बाण ॥

—अस्राः कचा अपि ॥ १६४॥

अस्र—केश, कोना आंसू तथा लोहू ॥ १६४ ॥

अजातशृंगो गौः काले-ऽप्यश्मश्रुर्ना च तूवरौ ।

तूवर—समयपर जिसके सींग न जमे हों ऐसा बैल, समयपर जिसके मूंछे न जमी हों ऐसा पुरुष ॥

स्वर्णेऽपि राः—

रै—धन तथा सुवर्ण (सोना) ॥

—परिकरः पर्यंकपरिवारयोः ॥ १६५ ॥

परिकर—पलँग और कुटुम्ब ॥१६५॥

मुक्ताशुद्धौ च तारः स्या—

तार—ऊंचा शब्द, नक्षत्र, आंखकी पुतली, मोती, सफाई, गोल मोती, गोल और निर्मल मोतीसे बना हार, जलसे पार उतरना, एक बानरका नाम तथा चांदी धातु ॥

–च्छारो वायौ स तु त्रिषु । कर्बुरे–

शार–चितकबरा–री, चौपड़ इत्यादिके खेलनेकी गुट्टी तथा वायु ॥

–ऽथ प्रतिज्ञाजिसंविदापत्सु संगरः ॥ १६६ ॥

संगर–संग्रामका युद्ध, प्रतिज्ञा, सलाह तथा आपत्ति वा विपत्ति॥१६६॥

वेदभेदे गुप्तवादे मन्त्रो–

मन्त्र–मन्त्र वा सलाह, एक वेदका भेद तथा गुप्त बोलना ॥

–मित्रो रवावपि ।

मित्र–सूर्य, मित्र (दोस्त) तथा अपने समीपके राजासे व्यवहित राजा ॥

मखेषु यूपखण्डेऽपि स्वरु–

स्वरु–इन्द्रका वज्र तथा यज्ञमें खम्भके छीलनेके समय उसमेंसे गिरा हुआ पहिला टुकड़ा ॥

–र्गुह्येऽप्यवस्करः ॥१६७ ॥

अवस्कर–विष्ठा तथा स्त्री वा पुरुषका मूत्रेन्द्रिय (उपस्थ) ॥१६७॥

आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ।

आडम्बर–तैयारी, बाजेका शब्द तथा बड़े हाथियोंका शब्द ॥

अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ॥ १६८ ॥

अभिहार–चोराना, कवच इत्यादिका धारण तथा नालिश इत्यादि शत्रुके नाशका उपाय ॥ १६८ ॥

स्याज्जङ्गमे परीवारः खड्गकोषे परिच्छदे ।

परीवार–कुटुम्ब, तरवार इत्यादिका म्यान तथा लाव, लश्कर ॥

विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ॥ १६९ ॥

विष्टर–बैठनेका आसन, वृक्ष, दर्भमुष्टि (एक प्रकारका परिमाण) वा नाप ॥ १६९ ॥

द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ।

प्रतीहार, प्रतीहारिन्–द्वार तथा द्वारपाल ॥

विपुले नकुले विष्णौ बभ्रुर्ना पिंगले त्रिषु ॥१७०॥

बभ्रु–पीले रंगवाली वस्तु, पीला रंग, बड़ा नौला, विष्णु तथा एक यादव १७०

सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु ।

सार–श्रेष्ठ वा प्रधान, बल, वस्तुका स्थिर भाग, बाहीर, मज्जा व चरबी, पानी, धन तथा उचित वा न्यायके अनुसार ॥

दुरादरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ १७१ ॥

दुरोदर—जुआरी, दाव (जो द्रव्य जुएमें लगाया जाता है) जुआ ॥१७१॥

महारण्ये दुर्गपथे कान्तारं पुंनपुंसकम् ।

कान्तार—दुर्गम वा टेढ़ा मार्ग, बड़ा वन एक प्रकारका ऊख ॥

मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ॥ १७२ ॥

मत्सर—ईर्ष्या वा डाह करनेवाला (ली) कृपण, तथा ईर्ष्या वा डाह १७२

देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ।

वर—श्रेष्ठ वा प्रधान, वा मुख्य देवताने जो प्रसन्न होकर दिया, दूलह वा वर, केशर ॥

वंशांकुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥ १७३ ॥

करीर—बांसका छकड़ा, करील वा टेंटी वृक्ष, एक प्रकारका कांटेदार वृक्ष वा कीकर तथा घटना वा मेल १७३॥

ना चमूजघने हस्ते सूत्रे प्रतिसरोऽस्त्रियाम् ।

प्रतिसर—सेनाका पिछला हिस्सा, तथा मन्त्रतन्त्रका डोरा ॥

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १७४ ॥ शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ।

हरि—यम, वायु, इन्द्र, चन्द्र, सूर्य, विष्णु, सिंह, किरण, घोडा ॥ १७४ ॥ तोता, सांप, बन्दर, मेढक और हरा रङ्ग तथा कपिल रङ्ग और कुछ पीली वस्तु ॥

शर्करा कर्परांशेऽपि—

शर्करा—ठिकडी, कंकडी, खांड, रेता तथा बहुत किड़िओंकी जमीन ॥

—यात्रा स्याद्यापने गतौ ॥ १७५ ॥

यात्रा—गमन वा चलना तथा चालना ॥ १७५ ॥

इरा भूवाक्सुराऽप्सु स्या—

इरा—मद्य, भूमि, वाणी तथा जल ॥

—त्तंद्री निद्राप्रमीलयोः ।

तन्द्री—निद्रा तथा आलस्य ॥

धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपि ॥ १७६ ॥

धात्री—माता, आमला, पृथ्वी तथा उपमाता अर्थात् दूध पिलानेवाली धाय ॥ १७६ ॥

क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका । त्रिषु क्रूरोऽधमेऽल्पेऽपि क्षुद्रं—

क्षुद्र—क्रूर, अधम, अल्प वा थोड़ा (डी) सूम, मधुमाछी, भटकटैया, हीन अंगवाली स्त्री, नटी, वेश्या ॥

–मात्रा परिच्छदे ॥ १७७ ॥

अल्पे च परिमाणे सा मात्रं कार्त्स्न्ये-ऽवधारणे।

मात्रा–परिच्छद व सामग्री॥१७७॥ परिमाण, सूक्ष्म वा पतला, सम्पूर्णता, तथा अवधारण वा निश्चय ॥

आलेख्याश्चर्ययोश्चित्रं–

चित्र–चित्रविचित्ररंगवाला-ली, आश्चर्ययुक्त, कई एक मिश्रितरङ्ग, एक नक्षत्र, मूसाकर्णी औषध, एक तरहकी ककडी,अद्भुतरस, तसबीर तथा आश्चर्य

–कलत्रं श्रोणिभार्ययोः॥१७८॥

कलत्र–कमर तथा स्त्री ॥ १७८ ॥

योग्यभाजनयोः पात्रं–

पात्र–लायक तथा बर्तन ॥

–पत्रं वाहनपक्षयोः ।

पत्र–सवारी और पंख ॥

निदेशग्रन्थयोः शास्त्रं–

शास्त्र–आज्ञा और ग्रन्थ ॥

–शस्त्रमायुधलोहयोः ॥ १७९ ॥

शस्त्र–हथियार और लोहा॥१७९॥

स्याज्जटांशुकयोर्नेत्रं–

नेत्र–जटा और वस्त्र तथा नेत्र ॥

–क्षेत्रं पत्नीशरीरयोः ।

क्षेत्र–स्त्री तथा शरीर, खेत ॥

मुखाग्रे क्रोडहलयोः पोत्रं–

पोत्र–सूकरके मुखका अग्रभाग तथा हलका अग्रभाग ॥

–गोत्रं तु नाम्नि च ॥ १८० ॥

गोत्र–नाम, पृथ्वी, पर्वत तथा कुल ॥ १८० ॥

सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।

सत्र–ढक्कन, यज्ञ, सदादान,(सदावर्त) धन, वन तथा धूर्तता ॥

अजिरं विषये काये–

आजिर–विषय, शरीर, वायु तथा आंगन ॥

–ऽप्यम्बरं व्योम्नि वाससि १८१

अम्बर-आकाश तथा वस्त्र १८१॥

चक्रं राष्ट्रे–

चक्र–राज्य, चकवा पक्षी, समूह, रथका पाहिया, कुम्हारका चाक तथा जलका भँवर ॥

–ऽप्यक्षरं तु मोक्षेऽपि–

अक्षर–मोक्ष, हरफ, ब्रह्म तथा ओंकार ॥

–क्षीरमप्सु च ।

क्षीर–दुग्ध तथा जल ॥

स्वर्णेऽपि भूरिचन्द्रौ द्वौ–

भूरि तथा चन्द्र-सुवर्ण और सुन्दर॥

द्वारमात्रेऽपि गोपुरम् ॥ १८२ ॥

गोपुर—नगरका द्वार तथा द्वारमात्र ॥ १८२ ॥

गुहादम्भो गह्वरे द्वे—

गह्वर—गुफा और पाखण्ड ॥

—रहोऽन्तिकमुपह्वरे ।

उपह्वर—एकान्त तथा समीप ॥

पुरोऽधिकमुपर्यग्रा—

अग्र—पुर, अधिक तथा ऊपर ॥

ण्यगारे नगरे पुरम् ॥ १८३ ॥ मन्दिरं चा—

पुर—मन्दिर—स्थान और नगर १८३॥

—ऽथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।

राष्ट्र—देश तथा उपद्रव ॥

दरोऽस्त्रियां भये श्वभ्रे—

दर—भय,गड्ढा तथा थोड़ा वा सूक्ष्म ॥

—वज्रोऽस्त्री हीरके पवौ १८४ ॥

वज्र—इन्द्रका वज्र, सेहुँड़वृक्ष तथा हीरा ॥ १८४ ॥

तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।

तंत्र—कुटुम्बका कार्य, सिद्धान्त, उत्तम औषध,प्रधान वा मुख्य, जुलाहा, एक प्रकारका शास्त्र, सामग्री, एक प्रकारकी वेदकी शाखा, ऐसा हेतु जो पदार्थोंको सिद्ध करता हो ॥

औशीरश्चामरे दण्डेऽप्यौशीरं शयनासने ॥ १८५ ॥

औशीर—चँवरका दण्ड, शयन और आसन । किसीके मतमें यह शब्द पृथक् २ शयन और आसनका वाचक है ॥ १८५ ॥

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले । व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ॥१८६ ॥

पुष्कर—तलाव, कमल, आकाश, जल, पुष्करमूल, हाथीके सूंडका अग्रभाग, बाजेका मुख ॥ १८६ ॥

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च १८७॥

अन्तर—पहरनेके वस्त्रादि, आत्मसम्बन्धी वा अपनी वस्तु, बाह्य वस्तु, अदृश्य वस्तु, अवकाश, अवधि, अदृश्य होना, भेद, तादर्थ्य, छिद्र, विना अवसर, मध्य, अन्तरात्मा ॥ १८७ ॥

मुस्तेऽपि पिठरं—

पिठर—मोथा, घास तथा मंथनदंड वा मथनिया ॥

—राजकशेरुण्यपि नागरम् ।

नागर—चतुर, नगरवासी, सोंठ तथा नागरमोथा ॥

शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम् ॥ १८८ ॥

शार्वर–मारनेवाला–ली, घन वा बड़ा अन्धकार ॥ १८८ ॥

गौरोऽरुणे सिते पीते–

गौर–श्वेत वा पीत वा लाल रंगवाली वस्तु, श्वेत रंग, पीला रंग, लाल रंग, तथा रजोधर्मसे पहिली अवस्थावाली स्त्री।

–व्रणकार्येऽप्यरुष्करः ।

अरुष्कर–घाव करनेवाला–ली,भेलावा ॥

जठरः कठिनेऽपि स्या–

जठर–कठोर वस्तु, वृद्ध वा बुड्ढा तथा पेट ॥

–दधस्तादपि चाधरः ॥ १८९ ॥

अधर–नीचे, नीचेका ओष्ठ, हीन तथा नीच ॥ १८९ ॥

अनाकुलेऽपि चैकाग्रो–

एकाग्र–एकाग्र वा तत्पर तथा स्वस्थचित्त ॥

–व्यग्रो व्यासक्त आकुले ।

व्यग्र–व्याकुल वा घबड़ाया–यी, दुश्चित्त ॥

उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्या–

उत्तर–उत्तर देशमें उत्पन्न हुआ-ई, श्रेष्ठ वा मुख्य, उत्तरदिशा, विराटका पुत्र, ऊपर, विराटकी पुत्री तथा उत्तर (जवाब) ॥

–दनुत्तरः ॥ १९० ॥ एषां विपर्यये श्रेष्ठे–

अनुत्तर–श्रेष्ठ और अश्रेष्ठ॥१९०॥

–दूरानात्मोत्तमाः पराः ।

पर–पराया–यी (वस्तु) अन्य–दूसरा–री, दूर, उत्तम वा श्रेष्ठ, शत्रु, केवल तथा अनन्तर ॥

स्वादुप्रियौ तु मधुरौ–

मधुर–स्वादु और प्रिय ॥

–क्रूरौ कठिननिर्दयौ ॥१९१॥

क्रूर–कठिन और दयाहीन॥१९१॥

उदारो दातृमहतो–

उदार–दाता,बड़ा,सरल वा सूधा ॥

–रितरस्त्वन्यनीचयोः ।

इतर–अन्य तथा नीच ॥

मन्दस्वच्छन्दयोः स्वैरः–

स्वैर–मन्द वा ढीला–ली तथा स्वच्छंद(अपने मनका काम करनेवाला) ॥

–शुभ्रमुद्दीप्तशुक्लयोः ॥ १९२ ॥

शुभ्र–श्वेत वर्णकी वस्तु, उद्दीप्त वा प्रकाशमान तथा श्वेत रंग ॥ १९२ ॥

इति रान्ताः ॥

चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।

मौलि–मस्तक, चोटी, मुकुट बँधे हुए बाल ॥

द्रुमप्रभेदमातंगकाण्डपुष्पाणि पीलवः ॥ १९३ ॥

पीलु—वृक्षभेद, हस्ती, बाण तथा पुष्प ॥ १९३ ॥

कृतान्तानेहसोः काल—

काल—यमराज, मृत्यु तथा समय ॥

—श्चतुर्थेऽपि युगे कलिः ।

कलि—चौथा युग, पुष्पकी कली, युद्ध तथा कलह ॥

स्यात्कुरंगेऽपि कमलः—

कमल—हिरन, जल, तांबा, कमल तथा आकाश ॥

—प्रावारेऽपि च कम्बलः॥१९४॥

कंबल—सर्पराज, गौके गलेका सास्ना तथा कम्बलवस्त्र ॥ १९४ ॥

करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम् ।

बलि—महसूल तथा बुढ़ापेमें पुरुष के शरीरमें पड़नेवाली सिकुड़न ॥

स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ॥ १९५ ॥

बल—मोटाई, सामर्थ्य, सेना, काक-पक्षी तथा बलदेव ॥ १९५ ॥

वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।

वातूल—आंधी, बावला, तथा वायुको न सहनेवाला ॥

भेद्यलिंगः शठे व्यालः पुंसि श्वापदसर्पयोः ॥ १९६ ॥

व्याल—सर्प, दगाबाज तथा हिंस-कपशु ॥ १९६ ॥

मलोऽस्त्री पापविट्किट्टा—

मल—मैल, पाप तथा विष्ठा ॥

—न्यस्त्री शूलं रुगायुधम् ।

शूल—रोग (जो पेटमें होता है) तथा शूल (एक शस्त्र)॥

शंकावपि द्वयोः कीलः—

कील—अग्निकी ज्वाला वा लपट तथा लोहे आदिकी कील ॥

पालिः स्त्र्यश्र्यंकपंक्तिषु ॥१९७॥

पालि—खड्ग इत्यादिका टोंका (कोना)धारा,चिह्न तथा पंक्ति॥१९७॥

कला शिल्पे कालभेदे—

कला—तीस काष्ठाका एक समय, कारीगरी, मूलधन, वृद्धि, टुकड़ा तथा चन्द्रका सोलहवां भाग ॥

ऽप्याली सख्यावली अपि ।

आलि—सखी तथा पंक्ति ॥

अब्ध्यम्बुविकृतौ वेला काल-मर्यादयोरपि ॥ १९८ ॥

वेला—समुद्रका तीर, काल व समय तथा मर्यादा वा हद्द ॥ १९८ ॥

बहुलाः कृत्तिका गावो बहुलो-ऽग्नौ शितौ त्रिषु ।

बहुल—बहुल, काले रंगवाला—ली, अग्नि वा आग, कृष्णपक्ष, काला रंग, नेवारीपुष्प, गैया, स्त्री, बड़ी इलायची और आकाश ॥

लीला विलासक्रिययो—

लीला—विलास या क्रीड़ा, क्रिया तथा खेलना ॥

—रुपला शर्करापि च ॥१९९॥

उपला—पत्थर, रत्न तथा सिटकी ॥ १९९ ॥

शोणितेऽम्भसि कीलालं—

कीलाल—जल तथा रुधिर ॥

—मूलमाद्ये शिफाभयोः ।

मूल—जड़, पहिला, वृक्षकी जटा तथा आभा और आदिकारण ॥

जालं समूह आनायगवाक्ष-क्षारकेष्वपि ॥ २०० ॥

जाल—मत्स्यादि पकड़नेका जाल, समूह, झरोखा तथा न फूली हुई कली ॥ २०० ॥

शीलं स्वभावे सद्वृत्ते—

शील—शुद्ध कर्म वा पवित्र काम तथा स्वभाव ॥

—सस्ये हेतुकृते फलम् ।

फल—वृक्ष इत्यादिका फल,जायफल, ढाल, हलके नीचेका काष्ठ(जिसका अग्र-भाग लोहेका बना रहता है),हेतु, सिद्ध किया गया बाणका अग्रभाग, त्रिफला, परिणाम तथा लाभ वा नफा ॥

छर्दिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०१ ॥

पटल—समूह, खपड़ा तथा एक नेत्ररोग ॥ २०१ ॥

अधःस्वरूपयोरस्त्री तलं—

तल—किसी वस्तुके नीचेका भाग तथा स्वरूप ॥

—स्याच्चामिषे पलम् ।

पल—एकदण्ड (२४ मिनट काल) का साठवां हिस्सा, ६४ मासा, मांस, तथा उँचाईका माप ॥

औवानलेऽपि पातालं—

पाताल—पाताल तथा वडवानल ॥

—चैलं वस्त्रेऽधमे त्रिषु ॥२०२ ॥

चैल—नीच वा अधम तथा वस्त्र ॥ २०२ ॥

कुकूलं शंकुभिः कीर्णे श्वभ्रे ना तु तुषानले ॥

कुकूल—करसीकी आग, कील व खूटियोंसे भरा हुआ गड्ढा ॥

निर्णीते केवलमिति त्रिलिंगं त्वेककृत्स्नयोः ॥ २०३ ॥

केवल—निर्णय किया गया, ‘ एक ’ संख्या तथा संपूर्ण ॥ २०३ ॥

पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।

कुशल—चतुर, सामर्थ्ययुक्त, कल्याणवाला—ली, सामर्थ्य, क्षेम, पुण्य तथा कल्याण ॥

प्रवालमंकुरेऽप्यस्त्री—

प्रवाल—मूंगा, नया पत्ता, अंकुर तथा वीणाका दण्ड ॥

—त्रिषु स्थूलं जडेऽपि च२०४॥

स्थूल—मोटा—टी, निर्बुद्धि वा बुद्धिरहित तथा समूह ॥ २०४ ॥

करालो दन्तुरे तुङ्गे—

कराल—भयंकर, ऊंचे दांतवाला—ली तथा ऊंचा—ची ॥

—चारौ दक्षे च पेशलः ।

पेशल—चतुर तथा मनोहर ॥

मूर्खेऽर्भकेऽपि बालः स्या—

बाल—लड़का, केश, बाल, मूर्ख तथा नेत्रवाला औषधी ॥

—ल्लोलश्चलसतृष्णयोः ॥२०५॥

लोल-चञ्चल तथा लालची॥२०५॥

इति लान्ताः ॥

दवदावौ वनारण्यवह्नी—

दव—दाव, वन तथा वनकी आग॥

—जन्महरौ भवौ ।

भव—संसार, जन्म, शंकर ॥

मन्त्री सहायसचिवौ—

मंत्रिन्—राजाका मंत्री वा राजाको सलाह देनेवाला तथा सहायक ॥

—पतिशाखिनरा धवाः ॥२०६॥

धव—स्त्रीका पति, एक वृक्ष तथा पुरुष ॥ २०६ ॥

अवयः शैलमेषार्का—

अवि—मेंढा, पर्वत, सूर्य तथा रजस्वला स्त्री ॥

—आज्ञाह्वानाध्वरा हवाः ॥

हव—पुकारना, आज्ञा वा हुक्म तथा यज्ञ वा याग ॥

भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥ २०७ ॥

भाव—अभिप्राय वा तात्पर्य, विद्वान् वा पंडित, सत्ता वा रहनेवालेका धर्म-स्वभाव, आत्मा, जन्म वा उत्पत्ति, चेष्टा तथा मनका विकार ॥ २०७ ॥

स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।

प्रसव—जनना, उत्पत्ति, फल तथा पुष्प वा फूल ॥

अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः ॥ २०८ ॥

निह्नव—अविश्वास, झूंठ बोलना तथा धूर्त्तपन ॥ २०८ ॥

उत्सेकामर्षयोरिच्छाप्रसवे मह उत्सवः ॥

उत्सव—उत्सव वा मंगलकार्य, औद्धत्य वा गर्व वा बडाई, कोप, इच्छाका वेग तथा आनन्दका समय ॥

अनुभावः प्रभावे च सतां च मतिनिश्चये ॥ २०९ ॥

अनुभाव—प्रभाव, सत्पुरुषोंकी बुद्धिका निश्चय ॥ २०९ ॥

स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ।

प्रभव—उत्पत्तिका स्थान, कारण, पराक्रम तथा ज्ञानका प्रथम स्थान ॥

शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ॥ २१० ॥

पारशव—शूद्रकी स्त्रीमें ब्राह्मणसे हुआ पुत्र तथा शस्त्र ॥ २१० ॥

ध्रुवो भभेदे क्लीबं तु निश्चिते शाश्वते त्रिषु ।

ध्रुव—स्थिर, नक्षत्रविशेष, निश्चय तथा शाश्वत ॥

स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ॥ २११ ॥

स्व—जातिके पुरुष, आत्मा, अपना तथा धन ॥ २११ ॥

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ॥

नीवी—स्त्रीके वस्त्रका बन्धन जो नाभिके समीप बांधा जाता है तथा मूलधन ॥

शिवा गौरीफेरवयो—

शिवा—पार्वती, सियार, शमीक वृक्ष, हर्र तथा आंवला ॥

—र्द्वन्द्वं कलहयुग्मयोः ॥२१२॥

द्वन्द्व—कलह तथा स्त्री पुरुषका जोडा ॥ २१२ ॥

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।

सत्त्व—द्रव्य, प्राण अत्यन्त उद्योग जन्तु, सत्त्वगुण तथा बल ॥

क्लीबं नपुंसके षण्डे वाच्यलिंगमविक्रमे ॥ २१३ ॥

क्लीब—नपुंसकलिङ्ग, नपुंसक पुरुष तथा पराक्रमहीन ॥ २१३ ॥

इति वान्ताः ॥

द्वौ विशौ वैश्यमनुजौ—

विट्—वैश्य मनुष्य तथा प्रवेश ॥

—द्वौ चराभिमरौ स्पशौ ।

स्पश—दूत तथा संग्राम ॥

द्वौ राशी पुञ्जमेषाद्यौ—

राशि—समूह तथा मेषवृषादि राशि ॥

—द्वौ वंशौ कुलमस्करौ ॥२१४॥

वंश—कुटुम्ब तथा बांस ॥ २१४ ॥

रहःप्रकाशौ वीकाशौ-

वीकाश-एकान्त तथा प्रकाश ॥

-निर्वेशो भृतिभोगयोः ।

निर्वेश-नौकरी,भोग तथा मूर्च्छा ॥

कृतान्ते पुंसि कीनाशः क्षुद्र-कर्षकयोस्त्रिषु ॥ २१५॥

कीनाश-यमराज तथा किसान२१५

पदे लक्ष्ये निमित्तेऽपदेशः स्यात्-

अपदेश-बहाना, निशाना वा लक्ष्य तथा निमित्त वा हेतु ॥

-कुशमप्सु च ।

कुश-कुश एक तरहकी घास तथा जल ॥

दशाऽवस्थानेकविधा-

दशा-अवस्था (लड़कई जवानी इत्यादि) ॥

प्याशा तृष्णापि चायता॥२१६॥

आशा-बड़ी तृष्णा तथा दिशा ॥ ॥ २१६ ॥

वशा स्त्री करिणी च स्याद्-

वशा-स्त्री, बांझ, गाय तथा हा-थिनी और बेटी ॥

-दृग्ज्ञाने ज्ञातरि त्रिषु । स्यात्कर्कशः साहसिकः कठोरामसृणावपि ॥ २१७॥

कर्कश-कठोर, दुःस्पर्श, साहसी तथा झगडेलू स्त्री और कबीला औषधि ॥ २१७ ॥

प्रकाशोऽतिप्रसिद्धेऽपि-

प्रकाश-अतिप्रसिद्ध, धूप, उजाला ॥

-शिशावज्ञे च बालिशः ।

बालिश-बालक तथा मूर्ख ॥

॥ इति शान्ताः ॥

सुरमत्स्यावनिमिषौ-

अनिमिष-देवता तथा मत्स्य वा मछली ॥

-पुरुषावात्ममानवौ ॥ २१८ ॥

पुरुष-पुरुष वा नर, आत्मा, नाग-केशर वृक्ष तथा मनुष्य ॥ २१८ ॥

काकमत्स्यात्खगौ ध्वांक्षौ-

ध्वाङ्क्ष-कौवा तथा मत्स्य पकड़नेवाला पक्षी (बगुला) इत्यादि ॥

-कक्षौ तु तृणवीरुधौ ।

कक्ष-कांख वा बगुला तथा तृण वा घासकी गंजी और लता ॥

अभीषुः प्रग्रहे रश्मौ-

अभीषु-किरण, डोरी तथा पगहा लगाम इत्यादि ॥

-प्रैषः प्रेषणमर्दने ॥ २१९ ॥

प्रैष-भेजना, मर्दन करना तथा आज्ञा देना ॥ २१९ ॥

पक्षः सहाये-

पक्ष-पक्षियोंका पंख, वा आधा महीना, सहाय, वैर, बल, मित्र, घर, शरीरकी अगलबलकी पँसली तथा बड़ा हाथी और निकट ॥

-ऽप्युष्णीषः शिरोवेष्टकिरीटयोः ।

उष्णीष-पगड़ी तथा किरीट व मुकुट ॥

शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ॥ २२० ॥

वृष-मूषा, जन्तु, श्रेष्ठ वा मुख्य, अडूसा एक झाड, वृषभनामक औषध, बलै, अण्डकोष, धर्म, मेष आदि १२ राशियोंमेंसे दूसरा राशि, सिंगिया(एक विष) तथा एक सुगंध चूर्ण ॥ २२० ॥

कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ॥

कोष (श)-पुष्पकी कली, तलवारका घर वा म्यान, खजाना तथा शपथ (सौगंध वा कसम) ॥

द्यूतेऽक्षे शारिफलकेऽप्याकर्षो-

आकर्ष-जूआ, गुट्टियोंके रखनेके लिये वस्त्रादिसे बना घर तथा पासा ॥

-ऽथाक्षमिन्द्रिये ॥ २२१ ॥ ना सुतांगे कर्षचक्रे व्यवहारे कलिद्रुमे ।

अक्ष-इंद्रिय ॥ २२१ ॥ पासा, सोलह मासा, बहेड़ा, सोंचरनोन ॥

कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्याभिधायिनि ॥ २२२ ॥

कर्षू-पासा, एक प्रकारकी तोल, पहिया, बहेड़ाफल, व्यवहार, करसीकी आग, जीविका तथा नदी ॥ २२२ ॥

पुंभावे तत्क्रियायां च पौरुषं-

पौरुष-पोरसामर गहिरा-री, पौरुष पुरुषका धर्म ॥

-विषमप्सु च ।

विष-विष वा जहर तथा पानी ॥

उपादानेऽप्यामिषं स्या-

आमिष-मांस तथा दूध ॥

दपराधेऽपि किल्बिषम् ॥२२३॥

किल्बिष-पाप, अपराध तथा प्रीति ॥ २२३ ॥

स्याद्वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।

वर्ष-बरस वा देवताओंका एक दिन, वृष्टि वा वर्षा, जम्बूद्वीप तथा स्नान ॥

प्रेक्षा नृत्येक्षणं प्रज्ञा-

प्रेक्षा-बुद्धि तथा देखना ॥

भिक्षा सेवार्थना भृतिः॥२२४॥

भिक्षा-भीख, सेवा, प्रार्थना वा मजूरी ॥ २२४ ॥

त्विट् शोभापि-

त्विष्–शोभा तथा वाणी ॥

–त्रिषु परे–

न्यक्ष–अध्यक्ष और रूक्ष यह तीनों शब्द तीनों लिंगोंमें होते हैं ॥

–न्यक्षं कात्स्न्र्यनिकृष्टयोः ॥

न्यक्ष–निकृष्ट वा नीच तथा संपूर्णता ॥

प्रत्यक्षेऽधिकृतेऽध्यक्षो–

अध्यक्ष–प्रत्यक्ष तथा अधिकारी ॥

–रूक्षस्त्वप्रेमण्यचिक्कणे २२५ ॥

रूक्ष–प्रेमरहित रूखा ॥ २२५ ॥

॥ इति षांताः ॥

रविश्वेतच्छदौ हंसौ–

हंस–सूर्य और हंसपक्षी ॥

–सूर्यवह्नी विभावसू ।

विभावसु–सूर्य तथा अग्नि ॥

वत्सौ तर्णकवर्षौ द्वौ–

वत्स–बछवा, बच्चा वा लड़का, छाती तथा वर्ष वा बारिस ॥

–सारंगाश्च दिवौकसः ॥२२६॥

दिवौकस्–देवता तथा पक्षी २२६॥

शृंगारादौ विषे वीर्ये गुणे रागे द्रवे रसः ।

रस–खट्टा मीठा इत्यादि ६ रस पारा, धातु, गन्धरस, शृङ्गार, वीर, करुणा इत्यादि साहित्यके रस, वीर्य वा धातु प्रीति वा प्रेम, जहर, स्वाद, पतलीवस्तु (जैसा पानी शरबत आदि)

पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे ॥ २२७ ॥

उत्तंस, अवतंस–कर्णफल वा कानका भूषण तथा शिरपेंच ॥ २२७ ॥

देवभेदेऽनले रश्मौ वसू रत्ने धने वसु ।

वसु–किरण वा प्रकाश, अग्नि वा आग, कुबेर, गुम्माभाजी, पानी, धन, तथा मणि ॥

विष्णौ च वेधाः–

वेधस्–ब्रह्मा, विष्णु तथा पंडित ॥

–स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः ॥ २२८ ॥

आशिस्–दूसरेके हितका चाहना और सर्पकी दंष्ट्रा ॥ २२८ ॥

लालसे प्रार्थनौत्सुक्ये–

लालसा–प्रार्थना तथा उत्कंठा वा बड़ी चाह ॥

–हिंसा चौर्यादिकर्म च ।

हिंसा–चोरी आदि बुरा कर्म तथा वध करना ॥

प्रसूरश्वापि–

प्रसू–माता तथा घोड़ी ॥

–भूद्यावौ रोदस्यौ रोदसी च ते ॥ २२९ ॥

रोदसी–द्विवचनांत, भूमि तथा आकाश ॥ २२९ ॥

ज्वालाभासौ न पुंस्यर्चि–

अर्चिस्–ज्वाला तथा प्रकाश ॥

–र्ज्योतिर्भद्योतदृष्टिषु ।

ज्योतिस्–ज्योतिर्विद्या, ताराप्रकाश तथा दृष्टि ॥

पापापराधयोरागः--

आगस्–पाप तथा अपराध ॥

--खगबाल्यादिनोर्वयः ॥२३०॥

वयस्–पक्षी और बाल्य आदि अवस्था ॥ २३० ॥

तेजःपुरीषयोर्वर्चो--

वर्चस्–तेज या प्रकाश वा चमक तथा विष्ठा ॥

--महस्तूत्सवतेजसोः ।

महस्–उत्सव तथा तेज ॥

रजो गुणे च स्त्रीपुष्पे–

रजस्--धूलि और रजोगुण तथा स्त्रीका हर महीनेका रुधिर ॥

--राहौ ध्वान्तेऽगुणे तमः २३१॥

तमस्--अन्धकार, राहुग्रह, तमोगुण अज्ञान तथा क्रोध ॥ २३१ ॥

छन्दः पद्येऽभिलाषे च--

छन्दस्--पद्य और अभिलाष तथा वेद ॥

--तपः कृच्छ्रादिकर्म च ।

तपस्--कृच्छ्रादिव्रत तथा लोकांतर अर्थात् कोई लोक ॥

सहो बलं सहा मार्गो–

सहस्--अगहन महीना तथा बल वा सामर्थ्य ॥

–नभः खं श्रावणो नभाः॥ २३२॥

नभस्–श्रावणमहीना तथा आकाश२३२

ओकः सद्माश्रयश्चौकाः–

ओकस्--आश्रय वा अवलंबन तथा घर।

–पयः क्षीरं पयोऽम्बु च ।

--पयस्- पानी तथा दूध ॥

ओजो दीप्तौ बले–

ओजस्--बल तथा प्रकाश ॥

–स्रोत इंद्रिये निम्नगारये२३३॥

स्रोतस्--सोत वा आपसे आप जल-का बहना, इन्द्रिय तथा नदीका वेग ॥ २३३ ॥

तेजः प्रभावे दीप्तौ च बले शुक्रे–

तेजस्--प्रभाव,प्रकाश,वीर्य,तथाकाम।

–ऽप्यतस्त्रिषु ।

यहांसे आगे सान्तवर्गकी समाप्ति-पर्यंत सब शब्द तीनों लिंगोंमें होते हैं॥

विद्वान्विदंश्च–

विद्वान्–पंडित वा जानकार तथा पत्र।

–बीभत्सो हिंस्रो–

बीभत्स-जिसको देखकर घिन्न उत्पन्न हो

घात करनेवाला, क्रूर वा कठोर तथा बीभत्स रस ॥

–ऽप्यतिशये त्वमी ॥ २३४ ॥ वृद्धप्रशस्ययोर्ज्यायान्–

ज्यायस्–बहुत बुड्ढा–बूढी तथा अत्यन्त प्रशंसा करनेके योग्य ॥२३४॥

कनीयांस्तु युवाल्पयोः ।

कनीयस्–अत्यन्त जवान, अत्यन्त छोटा तथा छोटा भाई ॥

वरीयांस्तूरुवरयोः–

वरीयस्–अत्यन्त बड़ा तथा अत्यन्त श्रेष्ठ ॥

–साधीयान्साधुबाढयोः॥२३५॥

साधीयस्–अत्यन्त साधु वा भलाली तथा अत्यन्त बहुत ॥ २३५॥

॥ इति सान्ताः ॥

दलेऽपि बर्ह–

बर्ह–मोरके पंख वा पूछ, पत्ता तथा करोंदा वृक्ष ॥

–निर्बन्धोपरागार्कादयो ग्रहाः ।

ग्रह–सूर्य इत्यादि ९ ग्रह, ग्रहण करना, यज्ञके पात्र, ग्रहण जो सूर्य चन्द्रको लगता है तथा आग्रह वा हठ ॥

द्वार्यापीडे क्वाथरसे निर्व्यूहो नागदन्तके ॥ २३६ ॥

निर्व्यूह–खूटी, शिरोवेष्टन (पगड़ी सिरपेंच इत्यादि) तथा द्वार और काढ़ा ॥ २३६ ॥

तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ।

प्रग्राह,प्रग्रह–कैदी जो चोर इत्यादि अपराधीका दण्ड है, पगहा वा पशु बांधनेकी डोरी, तराजू तथा घोडा इत्यादिकी लगाम ॥

पत्नीपरिजनादानमूलशापाः परिग्रहाः ॥ २३७ ॥

परिग्रह–पत्नी वा स्त्री, परिवार, अंगीकार तथा वृक्षादिकी जड़ और शाप ॥ २३७ ॥

दारेषु च गृहाः–

गृह–पत्नी तथा घर ॥

–श्रोण्यामप्यारोहो वरस्त्रियाः ।

आरोह-चढना, श्रेष्ठ स्त्रीका कटिभाग वा श्रेष्ठ स्त्रीकी कमर तथा वृक्ष इत्यादिकी ऊँचाई ॥

व्यूहो वृन्दे–

व्यूह–समूह तथा एक प्रकारकी सेनाकी रचना ॥

–ऽप्यहिर्वृत्रो–

अहि–सर्प तथा वृत्रनामा दैत्य ॥

–प्यग्नीन्द्वर्कास्तमोऽपहाः ॥२३८॥

तमोऽपहा–चन्द्र,सूर्य तथा अग्नि २३८॥

परिच्छदे नृपार्हेऽर्थे परिबर्हो–

परिबर्ह–राजाका छत्र, चमर इत्यादि चिह्न तथा सामग्री ॥

॥ इति हान्ताः ॥

–ऽव्ययाः परे ।

अव–इसके उपरांत अव्ययोंका वर्णन करते हैं जो कि तीनों लिंग, सातों विभक्ति और एकवचन द्विवचन बहुवचनमें समान बने रहते हैं और उनमें कुछ विकार नहीं होता ॥

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥ २३९ ॥

आङ्–ईषत्, अभिव्याप्ति, सीमार्थ और धातुके योगार्थमें होता है॥२३९॥

आ प्रगृह्यः स्मृतौ वाक्ये–

आ–स्मरण, वाक्यपूरणमें ॥

–ऽप्यास्तु स्यात्कोपपीडयोः ।

आः–कोपमें, पीडामें ॥

पापकुत्सेषदर्थे कु–

कु–पाप, निन्दा तथा थोड़े अर्थमें ॥

धिङ्निर्भर्त्सननिन्दयोः ॥२४०॥

धिक्–ग्लानि देना वा धिक्कारना तथा निन्दा ॥ २४० ॥

चान्वाचयसमाहारेतरेतरसमुच्चये ।

च–अन्वाचय, समाहार, इतरेतर और समुच्चयमें ॥

स्वस्त्याशीः क्षेमपुण्यादौ–

स्वस्ति-आशीर्वाद, कल्याण, पुण्य और मंगलमें ॥

–प्रकर्षे लंघनेऽप्यति ॥२४१॥

अति–अतिशय, बडाई, प्रकर्ष और लंघन अर्थमें ॥ २४१ ॥

स्वित्प्रश्ने च वितर्के च–

स्वित्–प्रश्न वा पूँछना तथा तर्क करनेमें ॥

–तु स्याद्भेदेऽवधारणे ।

तु–किन्तु, फेर, पादपूरणमें तथा अवधारणमें ॥

सकृत्सहैकवारे चा–

सकृत्–साथ वा संग तथा एकवारमें

–प्यारादूरसमीपयोः ॥२४२॥

आरात्–दूर तथा समीपमें २४२॥

प्रतीच्यां चरमे पश्चा–

पश्चात्–पीछे, पिछला तथा पश्चिमदिशामें ॥

दुताप्यर्थविकल्पयोः ।

उत–समुच्चय और विकल्पमें ॥

पुनः सहार्थयोः शश्व–

शश्वत्–सदा वा सर्वदा तथा निरन्तर वा हरदम और फिरमें ॥

-त्साक्षात्प्रत्यक्षतुल्ययोः॥२४३

साक्षात्-प्रत्यक्ष और तुल्यमें २४३

खेदानुकम्पासंतोषविस्मयामन्त्रणे बत ।

बत-खेद,दया,संतोष,आश्चर्य, जैसी इच्छा हो वैसा करो ऐसी आज्ञा देना॥

हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ २४४ ॥

हन्त-हर्ष, दया, वाक्यारंभ तथा विषाद ॥ २४४ ॥

प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ।

प्रति-मुख्यके समान व्याप्त करनेकी इच्छा, चिह्न तथा विपरीत ।

इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ॥ २४५ ॥

इति-हेतु, प्रकरण, प्रकाश, आदि तथा समाप्ति॥ २४५ ॥

प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि ।

पुरस्तात्-पूर्वदिशा, प्रथम, पूर्वकाल तथा आगे ॥

यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे॥ २४६ ॥

यावत्-तावत्-संपूर्ण, हद्द, तोल तथा निश्चय॥ २४६ ॥

मंगलानन्तरारम्भप्रश्नकार्त्स्न्येंष्वथो अथ ।

अथो-अथ-मंगल,अनन्तर, आरंभ, प्रश्न तथा संपूर्णता ॥

वृथा निरर्थकाविध्यो-

वृथा-निरर्थक, विधिहीन ॥

-र्नानानेकोभयार्थयोः ॥२४७॥

नाना-अनेक तथा उभयार्थक ॥ २४७ ॥

नु पृच्छायां विकल्पे च-

नु-प्रश्न तथा विकल्प॥

-पश्चात्सादृश्ययोरनु ।

अनु-पीछे तथा सदृशता ॥

प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु॥ २४८ ॥

ननु-प्रश्न, निश्चय, आज्ञा, शान्त करना तथा संबोधन ॥ २४८ ॥

गर्हासमुच्चयप्रश्नशंकासंभावनास्वपि ।

अपि-निन्दा, समुच्चय, प्रश्न, शंका तथा संभावना ॥

उपमायां विकल्पे वा-

वा-उपमा तथा विकल्प ॥

-सामि त्वर्धे जुगुप्सिते॥२४९॥

सामि-आधा तथा निन्दित॥२४९॥

अमा सह समीपे च-

अमा-साथ तथा समीप ॥

-कं वारिणि च मूर्धनि ।

कम्-जल तथा मस्तक ॥

इवेत्थमर्थयोरेवं-

एवम्-इवार्थक तथा प्रकारार्थक ॥

-नूनं तर्केऽर्थनिश्चये ॥ २५० ॥

नूनम्-तर्कणा तथा अर्थनिश्चय ॥ ॥ २५० ॥

तूष्णीमर्थे सुखे जोषं-

जोषम्-चुप होना तथा सुख ॥

-किं पृच्छायां जुगुप्सने ।

किम्-प्रश्न तथा निन्दा करना ॥

नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ॥ २५१ ॥

नाम-प्रसिद्धि, संभावना, क्रोध, सुन्दर वेष धारण करना तथा ललकारना ॥ २५१ ॥

अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ।

अलम्-अलंकार, परिपूर्णता, सामर्थ्य तथा मना करना ॥

हुं वितर्के परिप्रश्ने-

हुम्-तर्कणाकरना तथा प्रश्नकरना ॥

-समयान्तिकमध्ययोः ॥२५२॥

समया-समीप तथा मध्य ॥२५२॥

पुनरप्रथमे भेदे-

पुनर्-प्रथमके अनन्तर तथा भेद ॥

-निर्निश्चयनिषेधयोः ।

निर्-निश्चय तथा निषेध ।

स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ॥ २५३ ॥

पुरा-प्रबन्ध अर्थात् निरन्तर, प्राचीन समीप तथा होनेवाला ॥ २५३ ॥

ऊररीयूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।

ऊररी-ऊरी-उररी-विस्तार तथा अंगीकार करना ॥

स्वर्गे परे च लोके स्व-

स्वर्-स्वर्ग तथा परलोक ॥

-र्वार्तासंभाव्ययोः किल॥२५४॥

किल-वार्ता तथासंभावना ॥२५४॥

निषेधवाक्यालंकारजिज्ञासानुनये खलु ।

खलु-निषेध, वाक्यालंकार, जिज्ञासा तथा अनुनय ॥

समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ॥ २५५ ॥

अभितः-समीप, दोनों ओर, शीघ्र, चारों ओर तथा संमुख ॥ २५५ ॥

नामप्राकाश्ययोः प्रादु-

प्रादुस्-नाम तथा प्रकट ॥

मिथोऽन्योन्यं रहस्यापि ।

मिथस्-परस्पर तथा एकांत ॥

तिरोऽन्तर्धौ तिर्यगर्थे-

तिरस्-अन्तर्धान तथा टेढ़ा ॥

-हा विषादशुगार्तिषु ॥ २५६ ॥

हा-विषाद,शोक तथा पीडा ॥२५६॥

अहहेत्यद्भुते खेदे-

अहह-अद्भुत तथा खेद ॥

-हि हेतावववधारणे।

हि-हेतु तथा निश्चय ॥

इत्यनेकार्थवर्गविवरणम् ॥ ३ ॥

अथाव्ययवर्गः ४.

चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः।

बहुत कालवाचक अव्ययशब्द ६-चिराय १ चिररात्राय २ चिरस्य ३ आदि शब्दसे चिरम् ४ चिरेण ५ चिरात्, चिरे ६ ॥

मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १ ॥

बारम्बार अर्थवाचक अव्यय शब्द ५-मुहुः १ पुनःपुनः २ शश्वत् ३ अभीक्ष्णम् ४ असकृत् ५ ॥ १ ॥

स्राग्झटित्यञ्जसाह्नाय द्राङ्मंक्षु सपदि द्रुते।

शीघ्रतावाचक अव्यय शब्द ८-स्राक् १ झटिति २ अंजसा ३ अह्नाय४ द्राक् ५ मंक्षु ६ सपदि ७ द्रुतम् ८ ॥

-बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥

अतिशयवाचक अव्यय शब्द ६-बलवत् १ सुष्ठु २ किमुत ३ सु ४ अति ५ अतीव ६ ॥ २ ॥

पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने।

वर्जनवाचक वर्जनवाले अव्यय शब्द ६-पृथक् १ विना २ अंतरेण ३ ऋते ४ हिरुक् ५ नाना ६ ॥

यत्तद्यतस्ततो हेता-

कारणवाचक अव्यय शब्द ४-यत् तत् २ यतः ३ ततः ४ ॥

-वसाकल्ये तु चिच्चन ॥ ३ ॥

अपूर्णतावाचक अव्यय शब्द २-चित् १ चन २ ॥ ३ ॥

कदाचिज्जातु-

किसी कालवाचक अव्यय शब्द२-कदाचित् १ जातु २ ॥

-सार्धं तु साकं सत्रा समं सह।

साथ वाचक अव्ययशब्द५-साकम् १ सार्धम् २ सत्रा ३ समम् ४ सह५॥

आनुकूल्यार्थकं प्राध्वं-

अनुकूलतावाचक अव्यय शब्द १-प्राध्वम् १ ॥

-व्यर्थके तु वृथा मुधा ॥ ४ ॥

व्यर्थवाचक अव्यय शब्द २-
वृथा १ मुधा २ ॥ ४ ॥

आहो उताहो किमुत विकल्पे किं किमूत च ।

विकल्पार्थवाचक अव्यय शब्द ६-
आहो १ उताहो २ किमुत ३ किम् ४ किमु ५ उत ६ ॥

तु हि च स्म ह वै पादपूरणे-

श्लोककी पादपूर्णता बतानेवाले अव्यय शब्द ६-तु १ हि २ च ३ स्म ४ ह ५ वै ६ ॥

-पूजने स्वती ॥ ५ ॥

पूजावाचक अव्यय शब्द २-सु १ अति २ ॥ ५ ॥

दिवाह्नी-

दिनका अर्थवाचक अव्ययशब्द १-
दिवा १ ॥

-त्यथ दोषा च नक्तं च रजनाविति ।

रात्रिके अर्थवाचक अव्यय शब्द २-
दोषा १ नक्तम् २ ॥

तिर्यगर्थे साचि तिरो-

टेढ़े अर्थवाचक अव्यय शब्द २-
साचि १ तिरस् २ ॥

-प्यथ संबोधनार्थकाः ॥ ६ ॥ स्युः प्याट् पाडङ्ग हे है भोः-

सम्बोधनार्थवाचक अव्यय शब्द ६-
प्याट् १ पाट् २ अंग ३ हे ४ है ५ भोः ६ ॥ ६ ॥

-समया निकषा हिरुक् ।

समीपवाचक अव्यय शब्द ३-
समया १ निकषा २ हिरुक् ३ ॥

अतर्किते तु सहसा-

अकस्मात्का अर्थवाचक अव्यय शब्द १-सहसा-१ ॥

-स्यात्पुरः पुरतोऽग्रतः ॥ ७ ॥

आगेके अर्थवाचक अव्यय शब्द ३-
पुरः १ पुरतः २ अग्रतः ३ ॥ ७ ॥

स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा ।

देवताओं और पितरोंके हव्य देनेके उपयोगी वाचक अव्यय शब्द ५-स्वाहा १ श्रौषट् २ वौषट् ३ वषट् ४ स्वधा ५ पितरोंके उपयोगी प्रसिद्ध हैं ॥

किंचिदीषन्मनागल्पे-

अल्पके वाचक अव्यय शब्द ३-
किंचित् १ ईषत् २ मनाक् ॥ ३ ॥

-प्रेत्यामुत्र भवान्तरे ॥ ८ ॥

जन्मान्तरवाचक अव्यय शब्द २-
प्रेत्य १ अमुत्र २ ॥ ८ ॥

व वा यथा तथेवैवं साम्ये--

समतावाचक अव्ययशब्द ६-व १ वा २ यथा ३ तथा ४ इव ५ एवम् ६ ॥

-ऽहो ही च विस्मये ।

विस्मयवाचक अव्यय शब्द २-अहो १ ही २ ॥

मौने तु तूष्णीं तूष्णीकां-

मौनार्थवाचक अव्ययशब्द २-तूष्णीम् १ तूष्णीकाम् २॥

-सद्यः सपदि तत्क्षणे ॥ ९ ॥

तत्कालवाचक अव्ययशब्द २-सद्यस् १ सपदि २ ॥ ९ ॥

दिष्ट्या समुपजोषं चेत्यानन्दे-

आनन्दवाचक अव्ययशब्द २-दिष्ट्या १ समुपजोषम् २ ॥

-ऽथान्तरेऽन्तरा । अन्तरेण च मध्ये स्युः-

मध्यवाचक अव्ययशब्द ३-अन्तरे १ अन्तरा २ अन्तरेण ॥ ३ ॥

-प्रसह्य तु हठार्थकम् ॥ १० ॥

हठार्थवाचक अव्ययशब्द १-प्रसह्य १ ॥ १० ॥

युक्ते द्वे सांप्रतं स्थाने-

युक्तार्थवाचक अव्ययशब्द २-सांप्रतम् १ स्थाने २ ॥

-ऽभीक्ष्णं शश्वदनारते ।

निरंतरवाचक अव्ययशब्द-२-अभीक्ष्णम् १ शश्वत् २ ॥

अभावे नह्य नो नापि-

अभाववाचक अव्ययशब्द ४-नहि १ अ २ नो ३ न ४ ॥

मास्म मालं च वारणे ॥ ११ ॥

निषेधवाचक अव्ययशब्द ३-मास्म १ मा २ अलम्-३ ॥ ११ ॥

पक्षांतरे चेद्यदि च-

पक्षान्तरवाचक अव्ययशब्द २-चेत् १ यदि २ ॥

-तत्त्वे त्वद्धाञ्जसा द्वयम् ।

तत्त्वार्थवाचक अव्ययशब्द २-अद्धा १ अंजसा २ ॥

प्राकाश्ये प्रादुराविः स्या-

प्रकटवाचक अव्ययशब्द २-प्रादुस् १ आविस् २ ॥

दोमेवं परमं मते ॥ १२ ॥

अङ्गीकारवाचक अव्ययशब्द ३-ओम् १ एवम् २ परमम् ३ ॥ १२ ॥

समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।

सब ओरवाचक अव्ययशब्द ४-समन्ततः १ परितः २ सर्वतः ३ विष्वक् ४ ॥

अकामानुमतौ काम-

विना इच्छाके सलाह देनेमें १-कामम् १ ॥

–मसूयोपगमेऽस्तु च ॥ १३ ॥

ईर्षापूर्वक अङ्गीकारवाचक १–अस्तु १ ॥ १३ ॥

ननु च स्याद्विरोधोक्तौ–

विरुद्धउक्तिवाचक १–ननु १ ॥

–कच्चित्कामप्रवेदने ।

इच्छित प्रश्नवाचक १–कच्चित् १॥

निःषमं दुःषमं गर्ह्ये–

निन्दितवाचक २–निःषमम् १ दुःषमम् २ ॥

–यथास्वं तु यथायथम् ॥१४॥

यथायोग्यवाचक २–यथास्वम् १ यथायथम् २ ॥ १४ ॥

मृषा मिथ्या च वितथे–

मिथ्यावाचक २–मृषा १ मिथ्या २॥

–यथार्थं तु यथातथम् ।

सत्यवाचक २–यथार्थम् १ यथातथम् ॥

स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ॥ १५ ॥

निश्चयवाचक ५–एवम् १ तु २ पुनर् ३ वै ४ वा ५ ॥ १५ ॥

प्रागतीतार्थकं–

भूतकालवाचक १–प्राक् १ ॥

–नूनमवश्यं निश्चये द्वयम् ।

अवश्यवाचक २–नूनम् १ अवश्यम् ॥ २ ॥

संवद्वर्षे–

वर्षवाचक १–संवत् १ ॥

–ऽवरे त्ववर्ग–

प्रथमवाचक १–अर्वाक् १ ॥

–गामेवं–

निश्चित अंगीकारवाचक २–आम् १ एवम् २ ॥

–स्वयमात्मना ॥ १६ ॥

आत्मवाचक १–स्वयम् १ ॥१६॥

अल्पे नीचै–

अल्पवाचक अव्यय शब्द १–नीचैस् १ ॥

–र्महत्युच्चैः–

ऊंचावाचक १–उच्चैस् १ ॥

–प्रायो भू–

बाहुल्य (अकसर) वाचक १–प्रायः १ ॥

–म्न्यद्रुते शनैः ।

मन्दवाचक अव्ययशब्द १–शनैस् १

सना नित्ये–

नित्यवाचक १–सना १ ॥

–बहिर्बाह्ये–

बाहरवाचक १–बहिस् १ ॥

–स्मातीते–

भूतकालवाचक १–स्म १ ॥

–ऽस्तमदर्शने ॥ १७ ॥

अदर्शनवाचक १–अस्तम् १॥१७॥

अस्ति सत्त्वे—

भावार्थक अव्यय १—अस्ति १ ॥

—रुषोक्तावु—

कोपवचनवाचक १—उ १ ॥

—ऊं प्रश्ने—

प्रश्नवाचक १—ऊम् १ ॥

—ऽनुनये त्वयि।

शान्त करनेमें १—अयि १ ॥

हुं तर्के स्या—

तर्कवाचक १—हुम् १ ॥

—दुषा रात्रेरवसाने—

प्रातःकालवाचक १—उषस् १ ॥

—नमो नतौ ॥ १८ ॥

नमस्कारवाचक अव्ययशब्द १—नमस् १ ॥ १८ ॥

पुनरर्थेऽङ्ग—

पुनर्वाचक १—अङ्ग १ ॥

—निन्दायां दुष्ठु—

निन्दावाचक १—दुष्ठु १ ॥

—सुष्ठु प्रशंसने।

प्रशंसावाचक १—सुष्ठु १ ॥

सायं साये—

सायंकालवाचक १—सायम् १ ॥

प्रगे प्रातः प्रभाते—

प्रातःकालवाचक २—प्रगे १ ॥ प्रातर् २ ॥

—निकषाऽन्तिके ॥ १९ ॥

समीपवाचक १—निकषा १॥ १९॥

परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति।

गतवर्षवाचक १—परुत् १॥गतवर्षसे पहले वर्षका वाचक अव्यय १—परारि १ ॥ वर्त्तमान वर्षवाचक अव्यय १—ऐषमस् १ ॥

अद्यात्राह्नय—

इस दिनका वाचक अव्यय १—अद्य १ ॥

—थ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २० ॥ तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः।

'प्रथमदिन' इत्यादि अर्थमें पूर्वआदि शब्दसे "एद्युस्" प्रत्यय होकर पूर्व दिनका वाचक 'पूर्वेद्युः' उत्तर दिनका वाचक 'उत्तरेद्युः' अपरदिनका वाचक 'अपरेद्युः' इत्यादि शब्द बनते हैं जैसे- 'अधरेद्युः' 'अन्येद्युः' 'अन्यतरेद्युः' 'इतरेद्युः' ॥ २० ॥

उभयद्युश्चोभयेद्युः—

दोनों दिनके वाचक अव्यय २—उभयद्युः१ उभयेद्युः २ ॥

—परे त्वह्नि परेद्यवि ॥ २१ ॥

परदिनका वाचक१—परेद्यवि १॥२१॥

ह्यो गते—

व्यतीतदिनका वाचक अव्यय शब्द १–ह्यस् १ ॥

–ऽनागतेऽह्नि श्वः–

कलदिनका १–श्वस् १ ॥

–परश्वस्तु परेऽहनि ।

आनेवाले परसों दिनका वाचक १–परश्वः १ ॥

तदा तदानीं–

तिसकालके वाचक अव्यय २–तदा १ तदानीम् २ ॥

–युगपदेकदा–

एक समयके वाचक अव्यय २–युगपत् १ एकदा २ ॥

सर्वदा सदा ॥ २२ ॥

सदाकालवाचक अव्यय २–सर्वदा १ सदा २ ॥ २२ ॥

एतर्हि संप्रतीदानीमधुना सांप्रतं तथा ।

'इसी समय' इस अर्थके वाचक अव्यय शब्द ५–एतर्हि १ सम्प्रति २ इदानीम् ३ अधुना ४ सांप्रतम् ५ ॥

दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २३ ॥

पूर्वदिशा, पूर्वदेश और पूर्वकालमें 'प्राक्' शब्द है । उत्तर दिशा, उत्तरदेश और उत्तरकालवाचक अव्ययशब्द 'उदक्' पश्चिमदिशा पश्चिम देश और पश्चिमकालका वाचक अव्यय शब्द 'प्रत्यक्' इत्यादि ॥ २३ ॥

इत्यव्ययवर्गः ॥ ४ ॥

लिंगादिसंग्रहवर्गः ५.

सलिंगशास्त्रैः सन्नादिकृत्तद्धितसमासजैः । अनुक्तैः संग्रहे लिंगैः संकीर्णवदिहोन्नयेत् ॥ १ ॥

